व्ययन्ताम्परीमँय्यजमानꣳरायोमनुष्ष्याणाम् ॥ दिवःसूनु
रस्येषतेपृथिव्व्याँल्लोकऽआरण्ण्यस्तेपशुः ॥ ६ ॥ [६-१] उपा
सं. ८ वीरसि ॥ उपावीरस्युपदेवान्दैवीर्व्विशःप्रागुरुशिजोव्वह्नित १५३

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

मान् ॥ देवंस्त्वष्टुर्व्वसुरमह्व्यातैस्वदन्ताम् ॥ ७ ॥ रेवंतीर
मंद्धम् ॥ रेवंतीरमं द्धम्बृहंस्प्पतेधारयाव्वसूंनि ॥ ऋतस्यंत्त्वा
देवहविंह्पाशेंनुष्प्रतिमुञ्चामिधर्षामानुंषह् ॥८॥ देवस्यंत्त्वा ।
सवितुःप्प्रंसवेश्विनोर्ब्बाहुब्भ्यांम्पूष्णोहस्त्ताब्भ्याम् ॥ अग्नी
षोमाब्भ्याञ्जुष्टन्नियुनज्मि ॥ अद्भ्यस्त्वौषधीब्भ्योनुंत्त्वा
मातामंन्न्यतामनुंपितानुब्भ्रातासगब्भ्योनुसखासयूंत्थ्यह् ॥ ॥ ४३ ॥

१ धारय वसूनि पदम् । अत्र अश्वरश्मिमतिसुमतिश्वसुतचारयपृणिसेदिमेग्भ्रियधारय० (शु. य. प्रा. ३ अ. ९८ सू.) इत्यनेन वकारे परे धारयघटिताकारस्य दीर्घत्वं विधीयते । तेन धारयावसूनि । २ अत्र पिबासोमम् (शु. य. प्रा. ३ अ. १२९ सू.) इत्यनेन धर्षं इत्यकारस्य दीर्घः ।

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४१५५३५०

अग्नीषोमाभ्यान्त्वा जुष्टम्प्रोक्षामि ॥ ९ ॥ अपाम्पेरुः ॥
अपाम्पेरुरस्यापो देवीश्स्वदन्तु स्वात्तञ्चित्सद्देवहविः ॥ सन्ते
प्प्राणो व्वातेन गच्छताᳬंसमङ्गानि यजत्रैःसँय्यज्ञपतिराशिषा
॥ १० ॥ घृतेनाक्तौ । पशूँस्त्रायेथाᳬंरेवति यजमाने प्प्रिय
न्धाऽआविश ॥ उरोरन्तरिक्षात्सजूर्द्देवेन व्वातेनास्य हविष
स्त्मना यज समस्य तन्न्वा भव ॥ व्वर्षो व्वर्षीयसि यज्ञे यज्ञपतिन्धाः
स्वाहा देवेभ्यो देवेभ्यः स्वाहा ॥ ११ ॥ [५-२] माहिर्भूः ॥

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

माहिर्भूर्म्मापृदाकुर्न्नमस्त्तऽआतानानुर्व्वाप्प्रेहि ॥ घृतस्यकु
ल्याऽउपऽऋतस्यपत्थ्याऽअनु ॥ १२ ॥ देवीरापः । शुद्धाव्वो
ढ्ढसुपरिविष्टादेवेषुसुपरिविष्टाव्वयम्परिवेष्टारोभूयास्म ॥ १३॥
व्वाचन्ते ॥ व्वाचन्तेशुन्धामिप्प्राणन्तेशुन्धामिचक्षुस्त्तेशुन्धा
मिश्श्रोत्रन्तेशुन्धामिनाभिन्तेशुन्धामिमेढ्रन्तेशुन्धामिपायु
न्तेशुन्धामिचरित्राँस्त्तेशुन्धामि ॥ १४ ॥ मनस्त्ते ॥
मनस्त्तऽआप्प्यायताँवाक्क्तऽआप्प्यायताम्प्राणस्त्तऽआप्प्याय

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

ताञ्चक्षुंस्त्तऽआप्प्यायताᳪंश्श्रोत्रन्त्तऽआप्प्यायताम् ॥ यत्तेंक्रू
रँऽयदास्त्थितन्तत्तऽआप्प्यायताञ्निष्ट्यायतान्तत्तेंशुन्धतुशम
होंभ्यः ॥ ओषधेत्रायस्वस्वधितेमैनᳪहिᳪसीः ॥ १५ ॥ रक्ष
साम्भागः ॥ रक्षसाम्भागोऽसिनिरस्त्तᳪरक्षऽइदमहᳪरक्षोभि
तिष्ठामीदमहᳪरक्षोवबाधऽइदमहᳪरक्षोधमन्तमोनयामि ॥ घृ
तेनद्यावापृथिवीप्प्रोर्ण्णुवाथांव्वायोवेस्त्तोकानामग्निराज्ज्यंस्यवे

---

१ निष्ट्यायताम् । अत्र निःस्त्यायताम् इति पदम् । अत्र नेःस्त्यास्तनोः (शु. य. प्रा. ३ अ. ७० सू.) इत्यनेन नेरुपसर्गात्परयोः स्त्यास्तन्योर्धात्वोः सकारस्य षकारो भवति संहितायाम् । इति षत्वे षात्तथौ मूर्धन्यम् इति ष्टुत्वे (शु. य. प्रा. ३. अ. ८० सू.) ऊष्मान्तस्थाभ्यश्च स्पर्श इत्यनेन टकारस्य द्वित्वम् ।

शु. य. संहि. तुस्वाहास्वाहांकृतेऽऊर्द्ध्नभसम्मारुतङ्गच्छतम् ॥ १६ ॥ पू. अ.
इदमापः ॥ इदमापुःप्प्रवहतावद्यञ्चमलंञ्चयत् ॥ यच्चाभिदु ॥ ६ ॥
॥ ४५ ॥ द्द्रोहानृतँय्यच्चशेपेऽअभीरुणम् ॥ आपोमातस्म्मादेनंसःपव
मानश्चमुञ्चतु ॥ १७ ॥ [६-३] सन्ते ॥ सन्तेमनोमनं
सासम्प्राणःप्प्राणेनगच्छताम् ॥ रेडस्यग्निष्ट्वाश्रीणात्वाप
स्त्वासमरिणन्वातस्यत्त्वाङ्घ्राज्यैपूष्णोरंहयाऽऊष्म्मणोव्यथ ॥ ४५ ॥
१६८
थिषत्प्रयुतन्द्वेषः ॥ १८ ॥ घृतङ्घृतपावानः ॥ घृतङ्घृतपा

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

वानँपिबतुब्बसाँब्बसापावानँपिबतान्तरिँक्षस्यहुविरसिस्वाहा॥
दिशः प्रदिशऽआदिशोंविदिशऽउद्दिशोदिग्भ्यः स्वाहा।१९।
ऐन्द्रः प्राणः॥ ऐन्द्रः प्राणोऽअङ्गेऽअङ्गेनिदीध्यदैन्द्रऽउदानो
ऽअङ्गेऽअङ्गेनिधीतँ॥ देवत्त्वष्टर्भूरितेसँसमेतुसलक्ष्मायद्वि
षुरूपम्भवाति॥ देवत्राऽयन्तमवसेसखायोनुत्त्वामातापितरो
मदन्तु॥ २०॥ [३-४] समुद्रङ्गच्छ॥ समुद्रङ्गच्छस्वाहा
न्तरिक्षङ्गच्छस्वाहादेवँसवितारङ्गच्छस्वाहामित्रावरुणौगच्छ

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

स्वाहाहोरात्रेगंच्छस्वाहाच्छन्दाꣳसिगच्छस्वाहाद्यावापृथिवी
गंच्छस्वाहायज्ञङ्गच्छस्वाहासोमङ्गच्छस्वाहादिव्यन्नभोगच्छ
स्वाहाग्निंवैश्वानरङ्गच्छस्वाहामनोमेहार्दियच्छदिवन्तेधूमो
गच्छतुस्वर्ज्योतिः पृथिवीम्भस्मनापृणस्वाहा॥२१॥ मापः॥
मापोमौषधीर्हिꣳसीर्द्धाम्नोधाम्नोराजँस्ततोवरुणनोमुञ्च ॥
यदाहुरघ्न्याऽइतिवरुणेतिशपामहेततोवरुणनोमुञ्च ॥ सुमि ॥ ४६ ॥
त्रियानऽआपऽओषधयःसन्तुदुर्म्मित्रियास्तस्मैसन्तुयो

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४१५५३५०

स्म्मान्द्वेष्टियञ्चंब्बुयन्द्विष्म्मः ॥ २२ ॥ [२-५] हुविष्म्मंती
रिमाः ॥ हुविष्म्मंतीरिमाऽआपोहुविष्म्माँ २ ॥ ऽआविवा
सति ॥ हुविष्म्मान्दुेवोऽअध्वुरोहुविष्म्माँ २ ॥ ऽअस्तुसूर्य्यं÷
॥ २३ ॥ अग्ग्नेर्व्वं÷ ॥ अग्ग्नेर्व्वोपन्नगृहस्युसदंसिसादयामीन्द्रा
ग्ग्न्योर्भागधेयींस्त्थमित्रावरुणयोर्भागधेयींस्त्थविश्श्वेषान्दे
वानाम्भागधेयींस्त्थ ॥ अमूर्ज्जाऽउपसूर्य्येयाभिर्व्वासूर्य्यं÷
सुह ॥ तानोहिन्न्वन्त्वध्वरम् ॥ २४ ॥ [२-६] हुदेत्त्वा ॥

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४१५५३५०

हृदेत्त्वामनसेत्त्वादिवेत्त्वासूर्य्यायत्त्वा ॥ ऊर्द्ध्वमिमम्मद्ध्वरन्दि
विदेवेषुहोत्राँयच्छ ॥ २५ ॥ सोमराजन् ॥ सोमराजन्विं
श्वास्त्त्वम्प्रजाऽउपावरोहुविश्वास्त्त्वाँम्प्रजाऽउपावरोहन्तु ॥
शृणोत्त्वग्निश्समिधाहवम्मेशृण्वन्त्त्वापोधिषणाश्चदेवीः ॥
[२] श्रोताग्ग्रावाणोविदुषोनयज्ञꣳशृणोतुदेवश्सविताहवम्मेस्वाहा
॥ २६ ॥ देवीरापःꣳ ॥ देवीरापोऽअपान्नपाद्योवऽऊर्म्मिर्हवि

१ अत्र विश्वाऽऊष्मान्तं परिक्षिपस्त्वं त्वाम् (शु. य. प्रा. ४ अ. २७ सू.) इत्यनेन विश्वापदम् ऊष्मान्तं (सान्तम्) जाते विश्वास्त्वम् विश्वास्त्वाम् ।
२ श्रोताग्ग्रावाणः । मिथासोमम् (शु. य. प्रा. ३ अ. १२९ सू.) इत्यनेन श्रोत इति क्रियापदस्थहस्वाकारस्य दीर्घः ।

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

ष्व्यऽइन्द्रियावान्मदिन्तमः ॥ तन्देवेभ्योदेवत्रादत्तशुक्रपे
भ्योयेषाम्भागस्त्थस्वाहा ॥ २७ ॥ कार्षिरसि ॥ कार्षिरसि
समुद्रस्यत्त्वाक्षित्त्याऽउन्नयामि ॥ समापोऽअद्भिरग्ग्मतसमो
षधीभिरोषधीः ॥ २८ ॥ यमग्ग्ने ॥ यमग्ग्नेपृत्त्सुमर्त्त्यमवा
वाजेषुयञ्जुनाः ॥ सयन्ताशश्वतीरिषःस्वाहा ॥ २९ ॥ [५-७]
देवस्यत्त्वा ॥ देवस्यत्त्वासवितुःप्प्रसवेश्विनोर्बाहुभ्याम्पूष्णो
हस्त्ताभ्याम् ॥ आददेरावासिगभीरमिममध्वरङ्कृधीन्द्रायसु १७३

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

षूर्तमम् ॥ उत्तमेनंपविनोर्ज्जस्वन्तुम्मधुमन्तुम्पयस्वन्तंनिग्ग्रा
ब्भ्यास्त्थदेवश्श्रुतंस्त्तर्प्पयतमामनोमे ॥ ३० ॥ मनोमे । तर्प्प
यतुव्वाचंम्मेतर्प्पयतप्प्राणम्मेतर्प्पयतचक्षुम्मेतर्प्पयतश्श्रोत्रंम्मे
तर्प्पयतात्त्मानंम्मेतर्प्पयतप्प्रजाम्मेतर्प्पयतपशून्मेतर्प्पयतग
णान्मेतर्प्पयतगणामेमाव्वितृषन् ॥ ३१ ॥ इन्द्रायत्त्वा ॥ इन्द्रा
यत्त्वाव्वसुमतेरुद्रवतऽइन्द्रायत्त्वादित्त्यवतऽइन्द्रायत्त्वाभिमा
तिग्घ्ने ॥ श्येनायत्त्वासोमभृतेग्ग्नयेत्त्वारायस्प्पोषदे ॥ ३२ ॥

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

यत्तेँ। सोमदिविज्ज्योतिर्य्यत्पृथिव्याँय्यदुरावन्तरिक्षे। तेना
स्म्मैयजमानायोरुरायेकृध्यधिदात्रेब्वोचः॥३३॥ श्वात्रास्त्थ॥
श्वात्रास्त्थवृत्रतुरोराधोगूर्त्ताऽअमृतस्यपत्नीः॥ तादेवीर्देवत्रे
मँय्यज्ञन्नयतोपहूताःसोमस्यपिबत ॥ ३४ ॥ माभेः ॥
माभेम्मासंविक्क्थाऽऊर्ज्जन्धत्स्वधिषणेवीड्वीसतीवीडयेथाम्
ऊर्ज्जन्दधाथाम् ॥ पाप्माहुतोनसोमः ॥ ३५ ॥ प्रागपा
क् ॥ प्रागपागुदगधराक्सर्वतस्त्वादिशऽआधावन्तु ॥ अम्ब
सं. ९ निष्पररसमरीव्विदाम्॥३६॥ त्वमङ्ग॥ त्वमङ्गप्रशꣳसिषोदेवश्शविष्ठमर्त्त्यम्॥ १७५
नत्त्वदुन्योमघवन्नस्तिमर्डितेन्द्र ब्रवीमितेव्वचः॥३७॥[८-८]
इति श्रीवाजसनेयसंहितायां षष्ठोऽध्यायः ॥ ६ ॥

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

श्रीवेदपुरुषाय नमः ॥ अनुवाकसू-
त्रम् ॥ वाचस्पतयेत्रिको, पयामगृहीतोसित्रिका, वायोद्विका,
यंवांद्विको, यावामेका, तंप्रत्क्थाचतस्रो,ऽयंवेनस्त्रिका,

1 निष्पर अत्र निः इति विसर्गस्य आविर्निर्दिव इत्याया वसतिर्वरितः (शु. य. प्रा. ३ अ. २३ सू.) इत्यनेन यथायोगं ककारपकारपरयोः विसर्जनीयस्य षकारः क्रियते इति षकारे कृते निष्परः । तत ऊष्मान्तस्थान्यश्च स्पर्शाः (शु. य. प्रा. ४ अ. १०२ सू.) इत्यनेन पकारस्य द्वित्वम् ।

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

येदेवासस्त्रिका, इन्द्राय मूर्द्धानंद्विकौ, यस्तएका, प्राणायमे
तिस्रो, मघवऽएकेन्द्राग्नीऽआगतमेका, घैको, मासऽएका, वि
श्वेदेवासऽआगतऽएके, न्द्रमरुत्वऽएका, मरुत्वन्तंवृषभमेका,
मरुत्वान्त्वा, सजोषाऽइन्द्रऽएका, मरुत्वाँ २ ॥ ऽइन्द्रऽएका,
महाँ २ ॥ ऽइन्द्रऽएका, महाँ २ ॥ ऽइन्द्रऽएको, दुत्यमष्टौ
पंचविꣳशतिरष्टाचत्वारिꣳशत् [अ. ७ मं. ४८ अनु. २५]

---

१ इति शतपथब्राह्मणपाठः ।

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

हरिः ॐ ॥ व्वाचस्प्पतयेपवस्वव्वृष्ण्णोऽअ॒ᳪ॒शुब्भ्याङ्गभंस्तिपूतᳫ ॥
देवोदेवेब्भ्यं÷पवस्वयेषाम्भागोसि ॥ १ ॥ मधुमतीर्न्नᳫ ॥ मधुम
तीर्न्नऽइषस्कृधियत्तेसोमादाब्भ्युन्नामजागृवितस्म्मैतेसोमसो
मायस्वाहास्वाहोर्व्वन्तरिक्षमन्न्वेमिस्वाङ्कृतोसि ॥ २ ॥ स्वाङ्कृ
तोसि । व्विश्श्वेब्भ्यऽइन्द्रियेब्भ्योदिव्येब्भ्यᳫपार्त्थिवेब्भ्योमनस्
स्त्वाष्टुस्वाहात्त्वासुभवसूर्ययदेवेब्भ्यस्त्वामरीचिपेब्भ्योदे ॥ ५० ॥

---

१ वाचस्प्पतये अत्र प्रकृत्या कखयोः पफयोश्च (शु. य. प्रा. ३ अ. ११ सू.) इत्यनेन विसर्गस्य प्रकृतिभावे प्राप्ते पतिशब्दस्यपरोद्वये (शु. य. प्रा. ३ अ. ३५ सू.) इत्यनेन पतिशब्दे परे विसर्जनीयस्य सकारे कृते ऽस्मात्स्यात्स्वस्य स्पर्शे (शु. य. प्रा. ४ अ. १०२ सू.) इत्यनेन पकारस्य द्वित्वम् ।

वांऽशुोयस्म्मैत्त्वेडेतत्त्सत्त्यमुंपरिप्प्रुतांभङ्गेनहुतोसौफड्म्मा
णायत्त्वाभ्युानायत्त्वा ॥ ३ ॥ [३-१] उपयामगृहीतोसि ॥
उपयामगृहीतोस्यन्तर्य्यच्छमघवन्पाहिसोम्मम् ॥ उरुष्ष्यराय
ऽएषोयजस्व ॥ ४ ॥ अन्तस्त्ते[1] ॥ अन्तस्त्तेद्यावापृथिवीदधा
म्म्यन्तर्द्धाम्म्युर्व्वन्तरिक्षम् ॥ सजूर्द्देवेभिरवरैःपरैश्चान्तर्य्या
मेमघवन्मादयस्व ॥ ५ ॥ स्वाङ्कृतोसि ॥ स्वाङ्कृतोसिविश्श्वेभ्यऽ १७१

१ अन्तस्त्ते । अत्र स्वरात्संयोगादिर्द्विरुच्यते सर्वत्र (शु. य. प्रा. ४ अ. १०० सू.) इत्यनेन नकारस्य द्वित्वे प्राप्ते सवर्गीये चानुत्तमे (शु. य. प्रा. ४ अ. ११५ सू.) इत्यनेन सवर्गीये तकारे परे द्वित्वनिषेधान्न द्वित्वम् ।

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

इन्द्रियेब्भ्यौदिव्येब्भ्युꣳपार्त्थिवेब्भ्योमनस्त्त्वाष्टुस्वाहात्त्वासु
भवसूर्य्यायदेवेब्भ्यस्त्त्वामरीचिपेब्भ्यऽउदानायत्त्वा ॥ ६ ॥
[३-२]आवायो ॥ आवायो भूषशुचिपाऽउपनꣳसहस्रन्तेनि
युतोविश्ववार ॥ उपोतेऽअन्धोमद्यमयामियस्यदेवदधिषेपूर्व्व
पेयंव्वायवेत्त्वा ॥ ७ ॥ इन्द्रवायूऽइमे । सुताऽउपप्प्रयोभिरागं
तम् ॥ इन्दवोवामुशन्तिहि ॥ उपयामगृहीतोसिव्वायवऽइन्द्र

१ इन्द्रवायुभ्याम् । अत्र पूर्वो इन्द्रेष्ववायुत्तु (शु. य. प्रा. ३ अ. १२८ सू.) इत्यनेन अवायौ इन्द्रसमासे पूर्वस्य पदान्तस्याकारस्य दीर्घविधाना-भावेन्द्रशब्दाकारस्य दीर्घाकारो वायुशब्दपरत्वात् ।

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

वायुभ्यान्त्वैषतेयोनिः सजोषोभ्यान्त्वा ॥ ८ ॥ [२-३]
अयंवांम् ॥ अयंवाम्मित्रावरुणासुतश्सोमऽऋतावृधा ॥ म
मेदिह श्रुतहवम् ॥ उपयामगृहीतोसिमित्रावरुणाभ्यान्त्वा
॥ ९ ॥ रायाव्वयम् ॥ रायाव्वयसंसवाꣳसोमदेमहव्येनदेवा
यवसेनगावः ॥ तान्धेनुम्मित्रावरुणायुवन्नोविश्वाहाधत्तमनं
पस्फुरन्तीमेषतेयोनिर्ऋतायुभ्यान्त्वा ॥ १० ॥ [२-४]
यावांम् ॥ यावाङ्कशामधुमत्यश्विनासूनृतावती ॥ तया

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४१५५३५०

यज्ञम्मिमिक्षतम् ॥ उपयाग्गृहीतोस्याश्विभ्यान्त्वैषतेयोनि
॥५२॥ र्म्माद्ध्वीभ्यान्त्वा ॥ ११ ॥ [१-५] तम्प्रत्क्कथा । पूर्व्व ॥७॥
थाव्विश्वथेमथाज्ज्येष्ठतातिम्बर्हिषदꣳस्वर्व्विदम् ॥ प्रतीचीनं
व्वृजनन्दोहसेधुनिमाशुञ्जयन्तमनुयासुवर्द्धसे ॥ उपयामगृ
हीतोसिशण्डायत्त्वैषतेयोनिर्व्वीरताम्पाह्यपमृष्टꣳशण्डोदेवा
स्त्वाशुक्क्रपाः प्प्रणयन्त्वनाधृष्टासि ॥ १२ ॥ सुवीरोव्वीरान् ॥ ॥५२॥
सुवीरोव्वीरान्प्रजनयन्परीह्यभिरायस्प्पोषेणयजमानम् ॥ १८२

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४१५५३५०

सुसुग्ग्मानोदिवापृथिव्याशुक्रश्शुक्रशोचिषानिरस्तःशण्डः
शुक्रस्याधिष्ठानमसि ॥१३॥ अच्छिन्नस्यते। देवसोमसुवीर्य्यं
स्यरायस्पोषस्यददितारःस्याम ॥ साप्प्रथमासँस्कृतिर्व्विश्ववा
रासप्प्रथमोव्वरुणोमित्रोऽअग्निः॥१४॥ सप्प्रथमः॥ सप्प्रथमो
बृहस्पतिश्चिकित्वाँस्तस्माऽइन्द्रायसुतमाजुहोतस्वाहा ॥
तृम्पन्तुहोत्रामध्वोयाःस्विष्टायाःसुप्प्रीताःसुहुतायत्स्वाहायां

१ तयोः सत् (शु. य. प्रा. २ अ. १३६ सू.) इत्यनेन नकारस्य सकारे अनुनासिकमुपधा प्रागन्तस्थायाः (शु. य. प्रा. ३ अ. १३१ सू.) इत्यनेन चोपधायामनुनासिके कृते रूपम्। नात्र धामन्छत्रून्. (शु. य. प्रा. ३ अ. १४६ सू.) इति निषेधस्यंपरत्वाभावात् ॥ २ तृम्पन्तु होत्राः। अत्र ऋवर्णेभ्यः (शु. य. प्रा. ३ अ. ८५ सू.) इत्यनेन समानपदे विधीयमानं णत्वं प्राप्तं परन्तु तवर्गे च (शु. य. प्रा. ३ अ. ९४ सू.) इत्यनेन निषेधान्न णत्वम्।

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४१५५३५०

शु. य. संहि.

॥५२॥ पू. अ. ॥७॥

डुग्ग्रीत् ॥ १५ ॥ [४-६] अयंवेनः ॥ अयंवेनश्चोदय

त्पृश्निगर्भाज्ज्योतिर्जरायूरजंसोविमाने ॥ इममपाꣳसङ्गमे

सूर्य्यस्यशिशुन्नविप्प्रामतिभीरिहन्ति ॥ उपयामगृहीतोसिम

र्कायत्त्वा ॥ १६ ॥ मनोन । येषुहवंनेषुतिग्ममंविपःशच्च्यावनु

थोद्रवन्ता ॥ आयश्शर्य्याभिस्तुविनृम्णोऽअस्याश्रीणीता

दिशङ्गभस्त्तावेषतेयोनिःप्रजाःपाह्यपमृष्टोमर्कोदेवास्त्वाम

न्थिपाःप्प्रणयन्त्वनाधृष्टासि ॥ १७ ॥ सुप्रजाः । प्प्रजाः ॥५३॥

१८४

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४१५५३५०

ष्मंजनयन्नपरींह्युभिरायस्पोषैणयजमानम् ॥ सञ्जग्मानो
दिवापृथिव्यामन्थीमन्थिशोंचिषानिरंस्तोमक्कौमन्थिनोंधि
ष्ठानंमसि ॥ १८ ॥ [३-७] येदैवासः ॥ येदैवासोदिव्येका
दशस्त्थपृथिव्यामध्येकादशस्त्थ ॥ अप्पुक्षितोमहिनैकादश
स्त्थतेदैवासोयज्ञमिमञ्जुषध्वम् ॥ १९ ॥ उपयामगृंहीतोसि ॥
उपयामगृंहीतोस्याग्ग्रयणोसिस्वाग्ग्रयणःपाहियज्ञम्पाहियज्ञ
पतिंविष्णुस्त्वामिंन्द्रियेणपातुविष्णुन्त्वम्पाह्यभिसवना

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४१५५३५०

निपाहि ॥ २० ॥ सोमः॑पवते ॥ सोमः॑पवतेसोमः॑पवतेस्मै
ब्रह्मणेस्मैक्षत्रायास्मैसुन्वतेयजमानायपवतऽइषऽऊर्ज्जेप
वतेद्भ्यऽओषधीभ्यःपवतेद्यावापृथिवीभ्याम्पवतेसुभूताय
पवतेविश्वेभ्यस्त्वादेवेभ्यऽएषतेयोनिर्विश्वेभ्यस्त्वादेवे
भ्यः ॥२१॥ [३-८] उपयामगृहीतोसीन्द्रायत्त्वाबृहद्व
तेव्वयस्वतऽउक्थाव्यङ्गृह्णामि ॥ यत्तऽइन्द्रबृहद्वयस्तस्मै
त्वाविष्णवेत्त्वैषतेयोनिरुक्थेभ्यस्त्वादेवेभ्यस्त्वादेवाव्यँ

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४१५५३५०

य्यज्ञस्यायुंषेगृह्णामिमित्त्रावरुणाब्भ्यान्त्वा ॥ २२ ॥ मित्त्रा
वरुणाब्भ्यान्त्वा । देवाव्व्यँय्यज्ञस्यायुंषेगृह्णामीन्द्रायत्त्वादेवा
व्व्यँय्यज्ञस्यायुंषेगृह्णामीन्द्राग्निब्भ्यान्त्वादेवाव्व्यँय्यज्ञस्यायु
षेगृह्णामीन्द्रावरुणाब्भ्यान्त्वादेवाव्व्यँय्यज्ञस्यायुंषेगृह्णामी
न्द्राबृहस्पतिब्भ्यान्त्वादेवाव्व्यँय्यज्ञस्यायुंषेगृह्णामीन्द्रावि
ष्णुब्भ्यान्त्वादेवाव्व्यँय्यज्ञस्यायुंषेगृह्णामि ॥ २३ ॥ [२-९] १८७
सं. १० मूर्द्धानन्दिवः ॥ मूर्द्धानन्दिवोऽअरतिम्पृथिव्याव्वैश्श्वानरमृतऽ

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

आजातमग्निम् ॥ कविꣳसम्म्राजमतिथिञ्जनानामासन्नापा
त्रंञ्जनयन्तदेवाः ॥ २४ ॥ उपयामगृहीतोसि । ध्रुवोसिध्रुव
क्षितिर्द्ध्रुवाणान्ध्रुवतमोच्युतानामच्युतक्षित्तमऽएषतेयोनिर्व्वै
श्वानरायंत्त्वा ॥ ध्रुवन्ध्रुवेणमनसाव्वाचासोममवनयामि॥अथा
नऽइन्द्रऽइद्विशोसपत्काः समनसस्करत् ॥२५॥[२-१०]यस्ते
द्रप्पस्कन्दतियस्तेऽअꣳशुर्ग्रावच्युतोधिषणयोरुपस्त्थात् ॥ ॥५५॥
अध्वर्य्योर्व्वापरिवायश्पवित्रात्तन्तेजुहोमिमनसाव्वषट्कृतꣳस्वा

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४१५५३५०

ह्वांदेवानामुत्क्रमणमसि ॥२६॥ [१-११] प्राणायमे। वर्च्चो
दा वर्च्चसे पवस्व व्यानायमे वर्च्चोदा वर्च्चसे पवस्वोदानायमे वर्च्चोदा
वर्च्चसे पवस्व वाचेमे वर्च्चोदा वर्च्चसे पवस्व क्रतुदक्षाभ्याम्मे वर्च्चो
दा वर्च्चसे पवस्व श्रोत्रायमे वर्च्चोदा वर्च्चसे पवस्व चक्षुर्भ्याम्मे व
र्च्चोदसौ वर्च्चसे पवेथमात्मनेमे ॥ २७॥ आत्मनेमे। वर्च्चोदा
वर्च्चसे पवस्वौजसेमे वर्च्चोदा वर्च्चसे पवस्वायुषेमे वर्च्चोदा वर्च्चसे पव
स्व विश्वाभ्योमे प्रजाभ्यो वर्च्चोदसौ वर्च्चसे पवेथाम् ॥ २८ ॥

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

शु. य. संहि. ॥५६॥ कौंसि । कतमोसिकस्यासिकोनामासि ॥ यस्यतेनामामन्म पू. अ.
हियन्त्वासोमेनातीतृपाम ॥ भूर्भुवᳫंस्व÷सुप्रजाःप्रजाभि÷ ॥ ७ ॥
स्याᳫंसुवीरोवीरैःसुपोषᳫंपोषैः÷ ॥ २९ ॥ [३-१२] उपया
मगृहीतोसिमधवेत्त्वोपयामगृहीतोसिमाधवायत्त्वोपयामगृ
हीतोसिशुक्रायत्त्वोपयामगृहीतोसिशुचयेत्त्वोपयामगृहीतो
सिनभसेत्त्वोपयामगृहीतोसिनभस्यायत्त्वोपयामगृहीतोसीषे ॥५६॥
त्त्वोपयामगृहीतोस्यूर्ज्जेत्त्वोपयामगृहीतोसिसहसेत्त्वोपयामगृ ११०

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

षक् ॥ येषामिन्द्रोयुवासखा ॥ उपयामगृहीतोस्यग्नीन्द्रा
ऽभ्यान्त्वैषतेयोनिरग्नीन्द्राऽभ्यान्त्वा ॥ ३२ ॥ [१-१५]
ओमासश्चर्षणीधृतः ॥ ओमासश्चर्षणीधृतोव्विश्वेदेवासऽआ
गत ॥ दाश्वाꣳसोदाशुषः सुतम् ॥ उपयामगृहीतोसिव्विश्वे
ऽभ्यस्त्वादेवेऽभ्यऽएषतेयोनिर्व्विश्वेऽभ्यस्त्वादेवेऽभ्यः ॥ ३३ ॥
[१-१६] व्विश्वेदेवासः ॥ व्विश्वेदेवासऽआगतशृणुतामऽइमꣳ

१ अत्र पिबासोमम्। (शु. य. प्रा. ३ अ. १२९ सू.) इत्यनेन चर्षणिशब्दस्येकारस्य दीर्घे चर्षणीधृतः। २ शृणुत मऽइमम्। अत्र शृणुतविषि-भजिभवतपिबेत्यत्रातिष्ठरक्षा मकारे (शु. य. प्रा. ३ अ. ११७ सू.) इत्यनेन मकारे परे एते दीर्घा भवन्ति। इति तकारस्य दीर्घे शृणुतामऽइमम्।

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

शु. य. संहि. षक् ॥ येषामिन्द्रोयुवासखा ॥ उपयामगृहीतोस्यग्नीन्द्रा पू. अ.
भ्यान्त्वैषतेयोनिरग्नीन्द्राभ्यान्त्वा ॥ ३२ ॥ [१-१५] ॥ ७ ॥
॥५७॥ ओमासश्चर्षणीधृतः ॥ ओमासश्चर्षणीधृतोविश्वेदेवासऽआ
गत ॥ दाश्वाꣳसोदाशुषः सुतम् ॥ उपयामगृहीतोसिविश्वे
भ्यस्त्वादेवेभ्यऽएषतेयोनिर्विश्वेभ्यस्त्वादेवेभ्यः ॥ ३३ ॥
[१-१६] विश्वेदेवासः ॥ विश्वेदेवासऽआगतशृ[2]णुतामऽइमꣳ ॥५७॥

---

१ अत्र पिबासोमम्। (शु. य. प्रा. ३ अ. १२९ सू.) इत्यनेन चर्षणिशब्दस्येकारस्य दीर्घे चर्षणीधृतः। २ शृणुत मऽइमम्। अत्र शृणुतस्विपिप्रजिभवतपिबेतक्षतिहरक्षा मकारे (शु. य. प्रा. ३ अ. ११७ सू.) इत्यनेन मकारे परे एते दीर्घा भवन्ति। इति तकारस्य दीर्घे शृणुतामऽइमम्।

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

हवम् ॥ एदम्बर्हिर्न्निषीदत[1] ॥ उपयामगृहीतोसि विश्वेब्भ्य
स्त्वादेवेब्भ्यऽएषतेयोनिर्व्विश्वेब्भ्यस्त्वादेवेब्भ्यः ॥ ३४ ॥
[१-१७] इन्द्रमरुत्त्वं ॥ इन्द्रमरुत्त्वऽइहपाहिसोमँय्यथा
शार्य्यातेऽअपिबःसुतस्य ॥ तवप्प्रणीतीतवशूरशर्म्मन्नाविवा
सन्तिकवयःसुयज्ञाः ॥ उपयामगृहीतोसीन्द्रायत्त्वामरुत्त्व
तऽएषतेयोनिरिन्द्रायत्त्वामरुत्त्वते ॥ ३५ ॥ [१-१८] मरु
त्त्वन्तंवृषभं । वावृधानमकवारिन्दिव्यःशासमिन्द्रम् ॥ १३२

[1] बर्हिर्निषीदत अत्र निःसीदत इति पदम् । अत्र नेः सीदतेः (शु. य. प्रा. ३ अ. ५६ सू.) इत्यनेन नेः परस्य सीदतेत्यत्रस्थसकारस्य षकारः ।

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४१५५३५०

व्विश्वासाहुमवंसेनूतंनायोग्ग्रꣳसंहोदामिहतꣳहुवेम ॥ उप
यामगृहीतोसीन्द्रायत्त्वामरुत्त्वंतऽएषतेयोनिरिन्द्रायत्त्वामरु
त्त्वंते ॥ [१-१९] उपयामगृहीतोसिमरुतान्त्वौजसे ॥३६॥
[१-२०] सजोषांऽइन्द्र ॥ सजोषांऽइन्द्रसगणोमरुद्भिꣳ
सोमंम्पिबवृत्रहाशूंरव्विद्वान् ॥ जहिशत्रूँ १ ॥ रपमृधोंनुद
स्वाथाभंयकृणुहिव्विश्वतोंनꣳ ॥ उपयामगृहीतोसीन्द्रायत्त्वा ॥५८॥

१ विश्वासाहम् । अत्र विश्वशब्दाकारस्य विश्वसहनुवपुषवसुषु (शु. य. प्रा. ३ अ. १०१ सू.) इत्यनेन सहपरे दीर्घाकारः । २ (इति शतपथे) । ३ शत्रूँ १ ॥ रपमृधः । अत्र स्वर औपशविः (शु. य. प्रा. ३ अ. १३२ सू.) इत्यनेन नकारस्य स्वरे परे अनुस्वारे उपधायामनुनासिक्ये च रूपम् ।

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४१५५३५०

मरुत्त्वंतऽएषतेयोनिरिन्द्रायत्त्वामरुत्त्वंते ॥ ३७ ॥ [१-२१]
मरुत्त्वाँ २ ॥ ऽइन्द्र । वृषभोरणायपिबासोममनुष्ष्वधम्म
दाय ॥ आसिञ्चस्वजठरेमद्ध्वऽऊर्म्मिन्त्वꣳराजासिप्प्रतिपत्त्सु
तानाम् ॥ उपयामगृहीतोसीन्द्रायत्त्वामरुत्त्वंतऽएषतेयोनि
रिन्द्रायत्त्वामरुत्त्वंते ॥३८॥ [१-२२] महाँ २॥ ऽइन्द्र÷ ॥
महाँ २ ॥ ऽइन्द्रोनृवदाचर्षणिप्प्राऽउतद्विबर्हाऽअमिनꣳसहो

१ मरुत्वान् इन्द्रः । अत्राकारोपधो यकारम् (शु. य. प्रा. ३ अ. १४३ सू.) इत्यनेन स्वरे परे नकारस्य यकारे कृते उपधायामनुनासिक्ये च यवयोः पदान्तयोः स्वरमध्ये लोपः (शु. य. प्रा. ४ अ. १२५ सू.) इत्यनेन यकारलोपे न परकाल० (शु. य. प्रा. ३ अ. ४ सू.) इत्यनेन सन्धेर्निषेधः । तथैव महाँ २ इन्द्रः ।

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

शु. य. संहि. ५९॥ भिः ॥ अस्म्मद्र्यग्वावृधेव्वीर्य्यायोरुश्पृथुश्सुकृतःकर्त्तृभि[१] पू. अ. ॥७॥
र्भूत् ॥ उपयामगृहीतोसिमहेन्द्रायत्त्वैषतेयोनिर्म्महेन्द्राय
त्त्वा ॥३९॥ [१-२३] महाँ २॥ऽइन्द्रः॥ महाँ २॥ऽइन्द्रो
यऽओजसापर्ज्जन्न्योवृष्टिमाँ २॥ऽइव॥ स्तोमैर्व्वत्सस्यवावृधे॥
उपयामगृहीतोसिमहेन्द्रायत्त्वैषतेयोनिर्म्महेन्द्रायत्त्वा ॥४०
[१-२४] उदुत्त्यम् ॥ उदुत्त्यञ्जातवेदसन्देवंव्वहन्तिकेतवः ॥ ॥५९॥ ११५

१ कर्तृभिः। अत्र परंतु रेफहकाराभ्याम् (शु. य. प्रा. ४ अ. १०१ सू.) इत्यस्यापवादभूतेन ऋत्मान्त. (शु. य. प्रा. ४ अ. १०२ सू.) इत्यनेन तकारस्य द्वित्वे प्राप्ते ऋवर्णे च (शु. य. प्रा. ४ अ. १११ सू.) इत्यनेन ऋवर्णे परे व्यञ्जनस्य द्विर्भावनिषेधात्र द्वित्वम्। एतादृशेष्वन्येष्वपि बोध्यम्।

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

दृशेव्विश्श्वायसूर्य्यꣳस्वाहा॥४१॥ चित्रन्देवानाम्॥ चित्रन्देवा
नामुदगादनीकञ्चक्षुर्म्मित्रस्यव्वरुणस्याग्ग्नेः ॥ आप्राद्यावा
पृथिवीऽअन्तरिक्षꣳसूर्य्यऽआत्माजगतस्तस्थुषश्चस्वाहा
॥ ४२ ॥ अग्ग्नेनय । सुपथारायेऽअस्म्मान्विश्श्वानिदेवव्वयुना
निव्विद्वान् ॥ युयोद्ध्यस्म्मज्जुहुराणमेनोभूयिष्ठान्तेनमऽउ
क्तिंव्विधेमस्वाहा ॥ ४३ ॥ अयन्नः ॥ अयन्नोऽअग्ग्निर्व्वरि
वस्कृणोत्त्वयम्मृधःपुरऽएतुप्प्रभिन्दन् ॥ अयंव्वाजाञ्जयतुव्वा १९७

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

जꣳसातावयꣳशत्रूँञ्जयतुजर्हृषाणꣳस्वाहा ॥ ४४ ॥ रूपेणवꣳ ॥
रूपेणवोरूपमभ्यागान्तुथोवोविश्ववेदाविभजतु ॥ ऋतस्य
पथाप्रेतचन्द्रदक्षिणाविस्वꣳपश्श्यव्युन्तरिक्षँय्यतस्वसदस्यैः
॥ ४५ ॥ ब्राह्मणमद्य । विदेयम्पितृमन्तम्पैतृमत्त्यमृषिमा
र्षेयꣳसुधातुदक्षिणम् ॥ अस्म्मद्राताद्देवत्राागच्छतप्रदातार
माविशत ॥ ४६ ॥ अग्नयेत्त्वा ॥ अग्नयेत्त्वामह्यंवरुणोददातु ॥ ६० ॥

१ विस्वः । अत्र वेर्युदयः (शु. य. प्रा. ३ अ. ६७ सू.) इत्यनेन वेः उपसर्गात्परस्य सकारस्य यकारोदये षकारो भवति। अतो नात्र सकारात्परस्य यकारोदयस्य वेरुपसर्गस्य सकारस्य षकारः ।

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

सोम्मृतत्त्वमंशीयायुर्द्दात्रऽएंधिमयोमह्यम्प्रतिग्ग्रहीत्रेरुद्रायं
त्वामह्यँव्वरुणोददातुसोम्मृतत्त्वमंशीयप्प्राणोदात्रऽएंधिव्वयो
मह्यम्प्रतिग्ग्रहीत्रेबृहस्प्पतंयेत्त्वामह्यंव्वरुणोददातुसोम्मृतत्त्व
मंशीयत्त्वग्ग्दात्रऽएंधिमयोमह्यम्प्रतिग्ग्रहीत्रेयमायंत्त्वामह्यं
व्वरुणोददातुसोम्मृतत्त्वमंशीयहयोंदात्रऽएंधिव्वयोमह्यम्प्रति
ग्ग्रहीत्रे ॥ ४७ ॥ कौंदात् ॥ कौंदात्त्कस्म्माऽअदात्त्कामोंदा
सं. ११ त्त्कामायादात् ॥ कामोंदाताकामं÷प्प्रतिग्ग्रहीताकामैतत्ते
॥ ४८ ॥ [८-२५] इतिश्रीवाजसनेयसंहितायांसप्तमोऽध्यायः॥ ७ ॥

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

॥ श्रीवेदपुरुषायनमः ॥ अनुवाकसूत्रम् ॥ उपयामगृ-
हीतोस्यादित्येभ्यः पंच, वाममद्यद्वे, सुशर्मास्येका, बृहस्प-
तिसुतस्यद्वे, हरिरसिचतस्रः, समिन्द्रेऽष्टौ, माहिः पंच,
ऽएजतुदशमास्यः पंचा, तिष्ठैका, युक्ष्वाह्येके, न्द्रमिदेका,
यस्मान्नद्वे, ऽग्नेपवस्वो, त्तिष्ठन्न, दृश्रमु, दुत्यमेकैका, जिघ्र ॥६१॥
द्वे, विनइन्द्र, वाचस्पतिं, ब्विश्वकर्मन्नेकैका, ग्नयेत्वाचतस्र, २००

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

इहरतिस्तिस्र:, परमेष्ठीदश, त्रयोविꣳशतिस्त्रिषष्टिः ॥ [अ. ८
मं. ६३ अनु. २३] हरिः ॐ ॥ उपयामगृहीतोसि ॥ उपया
मगृहीतोस्यादित्त्येभ्यंस्त्वा ॥ विष्ण्णंऽउरुगायैषतेसोमस्तꣳ
रक्षस्वमात्त्वादभन् ॥ १ ॥ कदाचन । स्त्तरीरंसिनेन्द्रंसश्चसि
दाशुषे ॥ उपोपेन्नुमंघवन्भूयऽइन्नुतेदानंन्देवस्यंपृच्यतऽआ
दित्त्येभ्यंस्त्वा ॥ २ ॥ कदाचन । प्प्रयुंच्छस्युभेनिपासिज
न्मनी ॥ तुरीयादित्त्युसवंनन्तऽइन्द्रियमातस्त्थावमृतंन्दि

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४१५५३५०

य. सं. ८॥

ह्यादित्त्येभ्यस्त्वा ॥ ३ ॥ यज्ञोदेवानाम् ॥ यज्ञोदेवाना पू. अ.

म्प्रत्त्यैतिसुम्नमादित्त्यासोभवतामृडयन्तः¹ ॥ आवोर्व्वाची ॥ ८ ॥

सुमतिर्व्ववृत्त्यादंहोश्चिद्यावरिवोवित्तरासदादित्त्येभ्यस्त्वा

॥ ४ ॥ विवस्वन्नादित्त्य ॥ विवस्वन्नादित्त्यैषतेसोमपीथस्त

स्मिन्मत्स्व ॥ श्रदस्मैनरोव्वचसेदधातनयदाशीर्दादम्पती

व्वाममश्नुतः ॥ पुमान्पुत्रोजायतेविन्दतेव्वस्वधाविश्वाहारपऽ ॥ ६२ ।

एधतेगृहे ॥ ५ ॥ [५-१] व्वाममद्य । सवितर्व्वाममुश्वोदिवे २०२

१ भवत मृडयन्तः । अत्र ऋणुस्विषिभ्रजिभवतपिबेतस्मतिएरक्षा मकारे (शु. य. प्रा. ३ अ. ११७ सू.) इत्यनेन मकारे दीर्घे भवता मृडयन्तः ।

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४१५५३५०

दिंवेद्वामसुस्म्म᳚भ्यंह्ऽसावी᳚ ॥ द्वामस्युहिक्षयंस्यदेवभूरेंरयाधि
यावांसुभाजं÷स्याम ॥ ६ ॥ उपयामगृंहीतोसि । सावित्रो
सिचनोधाश्चंनोधाऽअसिचनोमयिंधेहि ॥ जिन्वंयज्ञञ्जिन्व
यज्ञपंतिम्भगांयदेवायंत्त्वासवित्रे ॥ ७ ॥ [२-२] शतम्
॥ ३०० ॥ उपयामगृंहीतोसि । सुशर्म्मासिसुप्प्रतिष्ठानोबृहदु
क्षायुनमं÷ ॥ विश्वेभ्यस्त्वादेवेभ्यंऽएषतेयोनिर्विश्वेभ्य
स्त्वादेवेभ्यं÷ ॥ ८ ॥ [१-३] उपयामगृंहीतोसि ॥ उप

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४१५५३५०

यामगृंहीतोसिबृंहस्प्पतिंसुतस्यदेवसोमतऽइन्दौरिन्द्रियावतः
॥ ६२ ॥ पत्क्नीवतोग्ग्रहाँ २ ॥ ऽऋध्यासम् ॥ अहम्परस्त्तादहमवस्त्ता ॥ ८ ॥
द्यदन्तरिक्षन्तदुमेपिताभूत् ॥ अहꣳसूर्य्यमुभयतोददर्शाह
न्देवानाम्परमङ्गुहायत् ॥ ९ ॥ अग्ना ३॥ ऽइपत्क्नीवन् ॥
अग्ना ३ ॥ ऽइपत्क्नीवन्त्सजूर्द्देवेनत्त्वष्ट्रासोमम्पिबस्वाहा ॥
प्रजापतिर्वृषासिरेतोधारेतोमयिधेहिप्प्रजापतेस्त्तेवृष्णोरेतो ॥ ६३ ॥

१ बृहस्पतिसुतस्य । अत्र भाविभ्यः सः षं समानपदे (शु. य. प्रा. ३ अ. ५६ सू.) इत्यनेन सस्य षत्वे प्राप्ते अनुसन्तनोतु बृहस्पति० (शु. य. प्रा. ३ अ. ८२ सू.) इत्यनेन समानपदे सस्य प्रकृतिभावविधानान्न षत्वम् । तत ऊष्मान्तस्थाभ्यश्च स्पर्शः (शु. य. प्रा. ४ अ. १०२ सू.) इति पकारस्य द्वित्वम् ।

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४१५५३५०

धसोंरेतोधामंशीय ॥ १० ॥ [२-४] उपयामगृंहीतोसि ॥
उपयामगृंहीतोसिहरिरसिहारियोजनोहरिंभ्यान्त्वा ॥ हर्य्योर्
द्धानास्त्थसहसोमाऽइन्द्राय ॥ ११ ॥ यस्ते । ऽअश्वसनि
र्भक्षोयोगोसनिस्त्तस्यंतऽइष्टयंजुषस्त्तुतस्त्तोमस्यशस्त्तोक्थ
स्योपंहूतस्योपंहूतोभक्षयामि ॥ १२ ॥ देवकृतस्यैनंसः ॥
देवकृतस्यैनसोवयजनमसिमनुष्ष्यकृतस्यैनंसोवयजनमसिपि
तृकृतस्यैनंसोवयजनमस्यात्त्मकृतस्यैनंसोवयजनमस्येनंसऽए २०५

१ गोसनिस्त. । भाविभ्यः स्तः वं समानपदे (शु. य. प्रा. ३ अ. ५६ सू.) इत्यनेन पत्वप्राप्तौ अनुसन्त० (३ अ. ८२ सू.) इत्यनेन निषिध्यते ।

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४१५५३५०

नसोवयजंनमसि ॥ यच्चाहमेनोविद्वाँश्चकारयच्चाविद्वाँस्तस्य
सर्वस्यैनंसोवयजंनमासि॥१३॥ संवर्च्चसा ॥ संवर्च्चसापयसासन्त
नूभिरगंन्महिमनंसासᳪशिवेन ॥ त्वष्टांसुदत्रोविदंधातुरायो
नुंमार्ष्टुतन्वोयद्विलिष्टम् ॥१४॥ [४-५]सेमिंन्द्र।णोमनंसाने
षिगोभिःसᳪसूरिभिर्म्मघवन्त्सᳬस्वस्त्या ॥ सम्ब्रह्मणादेव
कृतँय्यदस्तिसन्देवानाᳬसुमतौयज्ञियानाᳬस्वाहा ॥ १५ ॥

१ समिन्द्रणो । अत्र इन्द्र नः इति पदद्वयेन आविश्य० (शु. य. प्रा. ३ अ. ५६ सू.) इत्यनेन समानपदत्वाभावाण्णत्वाप्राप्तौ निषण्णावत्यवाहण । मिन्द्रऽपूणमपरिणीयते समिन्द्रण० (शु. य. प्रा. ३ अ. ८३ सू.) इत्यनेन णत्वं निपात्यते ।

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

संव्वर्च्चसा ॥ संव्वर्च्चसापयसासन्तनूभिरगन्म्महिमनसासᳬशि
वेन।त्वष्टासुदत्रोव्विदधातुरायोनुमार्ष्टुतन्वोयद्विलिष्टम् ॥ १६ ॥
धातारातिः। सवितेदञ्जुषताम्प्रजापतिर्न्निधिपादेवोऽअग्निः ॥
त्वष्टाव्विष्णुः प्रजयासᳬरराणायजमानायद्रविणन्दधात
स्वाहा ॥ १७ ॥ सुगावः ॥ सुगावोदेवाःसदनाऽअकर्म्मयऽ
आजग्मेदᳬसवनञ्जुषाणाः ॥ भरमाणाव्वहमानाहवीᳬष्य
स्म्मेधत्तव्वसवोव्वसूनिस्वाहा ॥ १८ ॥ याँ २ ॥ ऽआवहᳬ ॥

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४१५५३५०

याँ २॥ ऽआवंहऽउशतोदैवदेवाँस्त्ताञ्ग्नेरयुखेऽअग्ग्नेसधस्त्थैं॥ पृ. अ. ॥ ८ ॥
जुक्षिवाॐसं÷पपिवाॐस श्श्वविश्श्वेसुंञ्ज्म्मंॐस्वरातिंष्ठुतानु
स्वाहा॥ १९॥ व्वयङ्कहि। त्त्वांप्प्रयतिसुज्ञेऽअस्स्मिमन्नग्ग्नेहोतार
मवृणीमहीह ॥ ऋधंगयाऽऋधंगुताशंमिष्ठाःप्प्रजानन्न्यज्ञमु
पयाहिव्विद्धान्त्स्वाहा॥२०॥ देवांगातुविदः॥ देवांगातुविदोगा
तुंव्वित्त्वागातुमिंत॥मनंसस्प्पतऽइमन्दैवयज्ञॐस्वाहावातेधाः ॥१५॥ २०८
॥ २१ ॥ यज्ञंयज्ञम् ॥ यज्ञंयज्ञङ्गच्छयज्ञपतिङ्गच्छस्वाँय्योनिं

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

ङ्गच्छस्वाहा ॥ एषतेयज्ञोयज्ञपतेसहसूक्तवाकꣳसर्व्ववीरस्तञ्जु
षस्वस्वाहा ॥ २२ ॥ [८-६] माहि÷माहिर्भुर्म्मापृदाकुꣳ ॥
उरुꣳहिराजावरुणश्चकारसूर्य्यायपन्थामन्वेतवाऽउ ॥ अप
देपादाप्रतिधातवेकरुतापवक्ताहृदयाविधश्चित् ॥ नमोवरुणा
याभिष्ठितोवरुणस्यपाश÷ ॥ २३ ॥ अग्नेरनीकम् ॥ अग्ने
रनीकमपऽआविवेशापान्नपात्प्रतिरक्षन्नसुर्य्यम् ॥ दमेदमेस

१ हृद्याविधश्चित् । अत्र अभ्ररश्मिमतिसुमतिश्वसुवचारयज्ञणिसेदिमेन्द्रियधारयविश्वभक्तुरयुनामस्यहृदय० (शु. य. प्रा. ३ अ. ९८ सू.) इत्यनेन वकारे परे हृदयाकारस्य दीर्घाकारो विधीयते । अतो हृदयशब्दाकारस्य दीर्घाकारः ।

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

मिधँ॑स्यक्ष्यग्नेष्प्रातिंतोजिह्वाघृतमुच्चरण्ण्युत्स्वाहा ॥ २४ ॥ समु
द्द्रेतें ॥ समुद्द्रेतेहृदयमप्प्स्वन्तश्श्सन्त्वाविशन्त्वोषधीरुतापः ॥
यज्ञस्यत्त्वायज्ञपतेसूक्कोक्कौनमोवाकेविंधेमयत्त्स्वाहा ॥ २५ ॥
देवीरापः ॥ देवीरापऽएषवोगर्भस्त्तᳬसुप्प्रीतᳬसुभृतम्बिभृत ॥
देवसोमैषतेलोकस्त्तस्मिञ्छञ्चवक्ष्वपरिचवक्ष्व ॥ २६ ॥ अवं
भृथनिचुम्पुण । निचेरुरसिनिचुम्पुणः ॥ अवदेवैर्देवकृतमे
नोयासिषमवमर्त्त्यैर्म्मर्त्त्यकृतम्पुरुराव्ण्णोदेवरिषस्प्पाहिदेवा

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

नाऽसमिदंसि ॥ २७ ॥ [५-७] एजंतुदशमास्यः ॥ एजं
तुदशमास्योगर्भोजरायुणासह ॥ यथायंवायुरेजंतियथासमु
द्रऽएजंति ॥ एवायन्दशमास्योऽअस्त्रंज्जरायुणासह ॥ २८ ॥
यस्यैते । यज्ञियोगर्भोयस्यैयोनिर्हिरण्ययी ॥ अङ्गान्यह्रु
तायस्यतम्मात्रासमंजीगमऽस्वाहा ॥ २९ ॥ पुरुदस्मोवि
षुरूपः ॥ पुरुदस्मोविषुरूपऽइन्दुरन्तर्म्महिमानमानञ्जधी
रः ॥ एकपदीन्द्विपदीन्त्रिपदीञ्चतुष्प्पदीमष्टापदीम्भुवनानु

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

ष्प्रथन्ताउँस्वाहा ॥ ३० ॥ मरुतोयस्य ॥ मरुतोयस्यहिक्षये
पाथादिवोविमहसः ॥ ससुगोपातमोजनः ॥ ३१ ॥ मही
द्यौः । पृथिवीचनऽइमंय्यज्ञम्मिमिक्षताम् ॥ पिपृतान्नोभरी
मभिः ॥ ३२ ॥ [५-८] आतिष्ठ । वृत्रहन्रथंय्युक्तातेब्र
ह्मणाहरी ॥ अर्व्वाचीनठ्सुतेमनोग्ग्रावाकृणोतुव्वग्गुना ॥
उपयामगृहीतोसीन्द्रायत्त्वाषोडशिनऽएषतेयोनिरिन्द्रायत्त्वा

१ अत्र पिबा सोमम् (शु. य. प्रा. अ. ३।३० सू.) इत्यनेन पाथ इत्यस्य ह्रस्वाकारस्य दीर्घः। २ आतिष्ठ वृत्रहन्। अत्र तिष्ठाद्युदात्तम्। (शु. य. प्रा. ३ अ. १०४ सू.) तिष्ठेत्येतत्पदं दीर्घमापद्यते यथाद्युदात्तं भवति। इत्यनेन विधीयमानो दीर्घाकार आतिष्ठपदस्य आद्युदात्तत्वाभावेन न दीर्घः।

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

षोडशिने ॥ ३३ ॥ [१-९] युक्ष्वाहि । केशिनाहरीवृषणा
कक्ष्यप्रा ॥ अथानऽइन्द्रसोमपागिरामुपश्रुतिञ्चर ॥ उप
यामगृहीतोसीन्द्रायत्त्वाषोडशिनऽएषतेयोनिरिन्द्रायत्त्वाषो
डशिने ॥ ३४ ॥ [१-१०] इन्द्रमित् ॥ इन्द्रमिद्धरीवहतोऽप्रति
धृष्टशवसम् ॥ ऋषीणाञ्चस्तुतीरुपयज्ञञ्चमानुषाणाम् ॥ उप
यामगृहीतोसीन्द्रायत्त्वाषोडशिनऽएषतेयोनिरिन्द्रायत्त्वाषो
डशिने ॥ ३५ ॥ [१-११] यस्मान्न । जातःपरोऽअन्योऽअ २१३

१ अत्र पिबा सोमम् (ऋ. ष. प्रा. ३ अ. १३० सू.) इत्यनेन अकारस्य दीर्घे युक्ष्वाहि इति ।

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४१५५३५०

स्त्तुयऽआविवेशभुवनानिविश्वा ॥ प्रजापतिष्प्रजयासꣳ
॥ १८ ॥ रराणस्त्रीणिज्ज्योतीꣳषिसचतेसषोडशी ॥ ३६ ॥ इन्द्रश्च । ॥ ८ ॥
सम्म्राड्वरुणश्चराजातौतेभक्षञ्चक्रतुरग्ग्रेऽएतम् ॥ तयोरहमनुभ
क्षम्भक्षयामिव्वाग्देवीजुषाणासोमस्यतृप्प्यतुसहप्प्राणेनस्वा
हा ॥ ३७ ॥ [२-१२] अग्ग्नेपवस्व ॥ अग्ग्नेपवस्वस्वपाऽअस्म्मे
वर्च्चःसुवीर्य्यम् ॥ दधद्रयिम्मयिपोषम् ॥ उपयामगृहीतोस्य ॥ १८ ॥
ग्नयेत्त्वाव्वर्च्चसऽएषतेयोनिरग्नयेत्त्वाव्वर्च्चसे ॥ अग्नेव्वर्च्चस्विन्व

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

र्चस्वाँस्त्वन्देवेष्ष्वसिव्वर्चस्वानहम्म्मनुष्ष्येषुभूयासम् ॥ ३८ ॥
[१-१३] उत्तिष्ठन्नोजसा ॥ उत्तिष्ठन्नोजसासहपीत्त्वीशिप्प्रेऽ
अवेपयः ॥ सोममिन्द्रचमूसुतम् ॥ उपयामगृहीतोसीन्द्राय
त्त्वौजसऽएषतेयोनिरिन्द्रायत्त्वौजसे ॥ इन्द्रौजिष्ठौजिष्ठस्त्त्व
न्देवेष्ष्वस्योजिष्ठोहम्म्मनुष्ष्येषुभूयासम् ॥ ३९ ॥ [१-१४]
अदृश्श्रमस्य । केतवोव्विरश्म्मयोजनाँ२ ॥ ऽअनु ॥ भ्राजन्तोऽ
अग्नयोयथा ॥ उपयामगृहीतोसिसूर्य्यायत्त्वाब्भ्राजायैषते

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

योनिꣳसूर्य्यायत्त्वाभ्भ्राजाय ॥ सूर्य्यभ्भ्राजिष्ठभ्भ्राजिष्ठस्त्त्व
॥ ६९ ॥ न्देवेष्ष्वसिभ्भ्राजिष्ठोहम्मनुष्ष्येषुभूयासम् ॥ ४० ॥ [१-१५] ॥ ८ ॥
उदुत्त्यम् ॥ उदुत्त्यञ्जातवेदसन्देवंव्वहन्तिकेतव÷ ॥ दृशेवि
श्वायसूर्य्यम् ॥ उपयामगृहीतोसिसूर्य्यायत्त्वाभ्भ्राजायैषते
योनिꣳसूर्य्यायत्त्वाभ्भ्राजाय ॥ ४१ ॥ [१-१६] आजिघ्र ॥
आजिघ्रकलशम्मह्यात्त्वाव्विशन्त्विन्दवꣳ ॥ पुनरूर्ज्जानिवर्त्त ॥ ६९ ॥
स्वसान÷सहस्रन्धुक्ष्वोरुधारापयस्वतीपुनर्म्माव्विशताद्द्रयिः

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४१५५३५०

॥ ४२ ॥ इडेरन्तें ॥ इडेरन्तेहव्येकाम्म्येचन्द्रेज्ज्योतेदितिसरं
स्वतिमहिविश्श्रुति ॥ एतातेऽअघ्न्येनामानिदेवेभ्योमासुकृत
म्ब्रूतात् ॥ ४३ ॥ [२-१७] विनेः ॥ विनऽइन्द्रमृधोजहि
नीचायच्छपृतन्न्युतः ॥ योऽअस्म्माँ२ ॥ ऽअभिदासत्त्यधं
रङ्गमयातमः ॥ उपयामगृहीतोसीन्द्रायत्त्वाविमृधऽएषते
योनिरिन्द्रायत्त्वाविमृधें ॥ ४४ ॥ [१-१८] वाचस्पतिं । २१७

१ अस्य मासानि । अत्र मासानिपदस्याङ् लिङ्गश्शब्दो बहुलम् (शु. प. प्रा. ३ अ. १८ सू.) इति सूत्रेण पदान्तीयस्य नित्यस्य कोपे प्राप्तेऽपि सूत्रे बहुलम् ग्रहणात्क्वचिन्न भवति । तेन चात्र लोपः । २ अत्र पिबा सोमम् (शु. प. प्रा. ३ अ. १३० सू.) इत्यनेन दीर्घाकारे जाते गमयातमः ।

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

शु. य. संहि. विश्वकर्म्माणमूतयेमनोजुवंव्वाजेऽअद्याहुवेम ॥ सनोविश्वा पू. आ.
॥७०॥ निहवनानिजोषद्विश्वशम्भुरवसेसाधुकर्म्मा ॥ उपयामगृही ॥ ८ ॥
तोसीन्द्रायत्त्वाविश्वकर्म्मणऽएषतेयोनिरिन्द्रायत्त्वाविश्वक
र्म्मणे ॥ ४५ ॥ [१-१९] विश्वकर्म्मन्हविषा ॥ विश्वकर्म्म
न्हविषाव्वर्द्धनेनत्रातारमिन्द्रमकृणोरवध्यम् ॥ तस्मैविशः
समनमन्तपूर्व्वीरयमुग्रोविहव्योयथासत् ॥ उपयामगृहीतो ॥ ७० ॥
२१८

---

१ अथ हुवेम । अत्र अथ सं एकारमकारमवतपूर्वामिहे... (छु. म. प्रा. ३ अ. ११५ सू.) इत्यनेन ... इकारमकारमवत-पूर्वामिहे... परेषु दीर्घमापद्यते । इति हुकारे परे अथशब्दाकारो दीर्घो जातः । तेन अद्याहुवेम इति ।

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४१५५३५०

सीन्द्रायत्त्वाव्विश्वकर्म्मणऽएषतेयोनिरिन्द्रायत्त्वाव्विश्वक
र्म्मणे ॥ ४६ ॥ [१-२०] उपयामगृहीतोसि ॥ उपयाम
गृहीतोस्यग्नयेत्त्वागायत्रच्छन्दसङ्गृह्णामीन्द्रायत्त्वात्रिष्टुप्च्छ
न्दसङ्गृह्णामिव्विश्वेब्भ्यस्त्वादेवेब्भ्योजगंच्छन्दसङ्गृह्णाम्म्यनु
ष्टुप्तेभिगरः ॥४७॥ व्रेशीनान्त्वा ॥ व्रेशीनान्त्वापत्मन्नाधू
नोमिकुकूननानान्त्वापत्मन्नाधूनोमिभन्दनानान्त्वापत्मन्
न्नाधूनोमिमदिन्तमानान्त्वापत्मन्नाधूनोमिमधुन्तमाना

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

न्त्वापत्नमुन्नाधूनोमिशुक्रन्त्वाशुक्रऽआधूनोम्म्यह्नोरूपेसूर्य्यं
स्यरश्मिषु ॥ ४८ ॥ ककुभꣳरूपं । वृषभस्यरोचतेबृह
च्छुक्रश्शुक्रस्यपुरोगाश्सोमꣳसोमस्यपुरोगाः ॥ यत्तेसोमादा
भ्युन्नामजागृवितस्म्मैत्वागृह्णामितस्म्मैतेसोमसोमायस्वा
हा ॥४९॥ उशिक्त्वम् ॥ उशिक्त्वन्देवसोमाग्ग्नेश्प्प्रियम्पाथो
पीहिवशीत्त्वन्देवसोमेन्द्रस्याप्प्रियम्पाथोपीह्यस्म्मत्त्सखात्त्व
न्देवसोमव्विश्श्वेषान्देवानाम्प्प्रियम्पाथोपीहि ॥५०॥ [४-२१]

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

इहरति÷ ॥ इहरतिरिहरमध्वमिहधृतिरिहस्वधृतिस्वाहा ॥
उपसृजन्धरुणम्मात्रेधरुणोमातरन्धयन् ॥ रायस्पोषमस्मा
सुदीधरत्स्वाहा ॥ ५१ ॥ सत्रस्यऽऋद्धि÷ ॥ सत्रस्यऽऋद्धिर
स्यगन्मज्योतिरमृताऽअभूम ॥ दिवम्पृथिव्याऽअध्यारुहामा
विदामदेवान्स्वर्ज्योति÷ ॥ ५२ ॥ युवन्तम् ॥ युवन्तमि
न्द्रापर्वतापुरोयुधायोन÷पृतन्यादपतन्तमिद्धतंवज्रेणतन्त २२१
मिद्धतम् ॥ दूरेचत्तायच्छन्त्सद्गहनंय्यदिनक्षत् ॥ अस्मा

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

कुद्धशात्रूँꣳपरिंशूरद्विश्वतोदुम्मादर्षीष्टद्विश्वतः ॥ भूर्भुवःस्वः
सुप्प्रजाःप्प्रजाभिःस्यामसुवीरांवीरैःसुपोषाःपोषैः ॥ ५३ ॥
[३-२२] परमेष्ठ्यभिधीतः[1] । प्प्रजापतिर्व्वाचिव्याहृतायाम
न्धोऽअच्छेतःसवितासन्न्यांव्विश्वकर्म्मादीक्षायाम्पूषासोमक्र
यण्ण्यामिन्द्रश्च ॥ ५४ ॥ इन्द्रश्च । मरुतश्चक्रयायामुपोत्थितो
सुरःपण्ण्यमानोमित्रःक्रीतोव्विष्णुःशिपिविष्टऽऊरावासन्नो

१ परमेष्ठ्यभिधीतः । अत्र परमेस्थ्यभिधीतः इत्यत्र भाविन्यः सः षं समानपदे (शु. य. प्रा. ३ अ. ५६ सू.) इत्यनेन सकारस्य षत्वे पाणभी-मूर्धन्यम् (शु. य. प्रा. ३ अ. ८१ सू.) इत्यनेन षकारात्परौ तथौ मूर्धन्यत्वमापद्येते । तकारस्य टकारो थकारस्य ठकारो भवतीति शेषम् । पूर्वं षकारस्य टकारे कृते तस्मान्तात्मकस्य स्पर्शः (शु. य. प्रा. ३ अ. १०१ सू.) इत्यनेन टकारस्य द्वित्वम् ।

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

विष्णुर्न्नरन्धिषः प्प्रोह्यमाणः सोमः ॥ ५५ ॥ प्रोह्यमाणः
सोमः ॥ प्रोह्यमाणः सोमऽआगतो वरुणऽआसन्द्यामासन्नो
ग्निराग्नीध्रऽइन्द्रो हविर्द्धानेथर्व्वोपावह्रियमाणो विश्वेदेवाः
॥ ५६ ॥ विश्वेदेवाः ॥ विश्वेदेवाऽअंशुषुन्न्युप्प्तो विष्णुरा
प्प्रीतपाऽआप्प्याय्य[1]मानो यमः सूयमानो विष्णुः सम्भ्रियमा
णो वायुः पूयमानः शुक्रः पूतः शुक्रः क्षीरश्रीर्म्मन्थी सक्तुश्रीर्व्वि

१ ओप्प्याय्यमानः । अत्र आप्यायमानो यमो० (शु. य. प्रा. ४ अ. १५१ सू.) इत्यनेन द्विः यकारा संयोगा भवन्ति तेन द्वियकारे कृते पुनस्तृतीये क्रमजे यकारे प्राप्ते तस्य निषेधः ।

श्वेंदेवाः ॥ ५७ ॥ विश्वेंदेवाः ॥ विश्वेंदेवाश्चमसेषून्नीतोसुर्हो
॥ ७२ ॥ मायोद्यतोरुद्रोहूयमानोव्वातोऽभ्यावृत्तोनृचक्षाःप्प्रतिक्ख्यातो ॥ ८ ॥
भक्षोभक्ष्यमाणःपितरोनाराशꣳसाःसन्नःसिन्धुः ॥ ५८ ॥
सन्नःसिन्धुः ॥ सन्नःसिन्धुरवभृथायोद्यतःसमुद्रोऽभ्यवह्रि
यमाणःसलिलःप्प्रप्लुतोययोरोजसास्कभितारजाꣳसिवीर्य्ये
भिर्व्वीरतमाशविष्ठा ॥ यापत्त्यैतेऽअप्प्रतीतासहोभिर्व्विष्ण्णूऽ ॥ ७३ ॥
अगन्वरुणापूर्व्वहूतौ ॥ ५९ ॥ देवान्दिवम् ॥ देवान्दिवम

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

गन्व्युज्ञस्त्ततोमाद्द्रविंणमष्टुमनुष्ष्यानुन्तरिंक्षमगन्व्युज्ञस्त्ततो
माद्द्रविंणमष्टुपितॄन्न्पृथिवीमंगन्व्युज्ञस्त्ततोमाद्द्रविंणमष्टुयङ्क्ञ्च
लोकमगंन्व्युज्ञस्त्ततोमेभुद्द्रमंभूत् ॥ ६० ॥ चतुंस्त्रिंᳬशुत्त
न्तंवᳬं ॥ चतुंस्त्रिᳬशुत्तन्तंवोयेवित्तत्क्रिरेयऽइमंय्युज्ञᳬस्व
धयाददंन्ते ॥ तेषांच्छिन्नᳬसम्म्वेतद्दंधामिस्वाहांघुर्म्मोऽ
अप्प्यैतुदेवान् ॥ ६१ ॥ युज्ञस्यदोहं÷ ॥ युज्ञस्यदोहोवित
तंᳬपुरुत्त्रासोऽअंष्टुधादिवंमुन्न्वातंतान ॥ सर्यज्ञधुक्क्स्वमहिंमे २२५

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

प्प्रजायांᳬरायस्पोषंव्विश्वमायुरशीयस्वाहा ॥ ६२ ॥ आपं
वस्व ॥ आपंवस्वहिरंण्ण्यवदश्वंवत्त्सोमव्वीरवंत् ॥ व्वाजंज्जोमं
न्तमाभंरस्वाहा ॥ ६३ ॥ [१०-२३] ॥ इतिश्रीवाजसनेय
संहितायामष्टमोऽध्यायः ॥ ८ ॥

१ हिरण्यवदश्ववत् । अत्र अश्वशब्दस्य वत्परे अश्वरश्मि० (शु. य. प्रा. ३ अ. ९८ सू.) इत्यनेन अश्वशब्दाकारस्य दीर्घाकारे प्राप्ते नाश्वहिरण्यात् (शु. य. प्रा. ३ अ. ९९ सू.) इत्यनेन हिरण्यशब्दात्परस्याश्वशब्दाकारो न दीर्घ इति निषेधाचात्राश्वशब्दाकारो दीर्घः ।

pdf by कृष्णाशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

श्रीवेदपुरुषाय नमः ॥ अनु
वाकसूत्रम् ॥ देवसवितश्चतस्र, इंद्रस्यवज्रः पंच, देवस्याहं
दशा, पयेस्वाहातिस्रो, वाजस्येममष्टा, वह्निरेकाक्षरेणचतुष्कौ,
षतेचचतुष्कौ, सवितात्वाद्वे, अष्टौचत्वारिꣳशत् [अ. ९ मं. ४०
अनु. ८] हरिः ॐ ॥ देवसवितꣳ ॥ देवसवितꣳप्रसुवयज्ञम्प्रसु
वयज्ञपतिम्भगाय ॥ दिव्योगन्धर्व्वꣳकेतपूꣳकेतन्नꣳपुनातुव्वाच
स्प्पतिर्व्वाजन्नꣳस्वदतुस्वाहा ॥ १ ॥ ध्रुवसदन्त्वा । नृषदम्मनꣳ
सदमुपयामगृहीतोसीन्द्रायत्त्वाजुष्टंगृह्णाम्म्येषतेयोनिरिन्द्रा
यत्त्वाजुष्टतमम् ॥ अप्सुषदन्त्वाघृतसदंव्योमसदमुपयाम २२७
गृहीतोसीन्द्रायत्त्वाजुष्टङ्गृह्णाम्म्येषतेयोनिरिन्द्रायत्त्वाजुष्टत

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४१५५३५०

मम् ॥ पृथिविसदन्त्वान्तरिक्षसदन्दिविसदन्देवसदन्नाकसद
मुपयामगृहीतोसीन्द्रायत्त्वाजुष्टङ्गृह्णाम्म्येषतेयोनिरिन्द्राय
त्त्वाजुष्टतमम् ॥ २ ॥ अपाᳫंरसम् ॥ अपाᳫंरसमुद्वयसᳫं
सूर्य्येसन्तᳫंसमाहितम् ॥ अपाᳫंरसस्ययोरसस्तंवोगृह्णाम्म्यु
त्तममुपयामगृहीतोसीन्द्रायत्त्वाजुष्टङ्गृह्णाम्म्येषतेयोनिरिन्द्रा

---

१ पृथिविसदन्त्वा । अत्र भाविभ्यः सः षं समानपदे (शु. य. प्रा. ३ अ. ५६ सू.) इत्यनेन समानपदे षत्वप्राप्तौ पृथिविदिव्युपरिषर्पणि-पाकुनियासिभ्यः (शु. य. प्रा. ३ अ. ८३ सू.) इत्यनेन पृथिविपरस्य सस्य षत्वनिषेधः। एवं दिविसदन्देवसदम् इत्यादिषु बोध्यम्। २ अपाᳫं रसम् अत्र। दीर्घादर्द्धमात्रा पूर्वाचाध्यर्द्धा (शु. य. प्रा. ४ अ. १४९ सू.) इत्यनेन दीर्घात्स्वरात्परोऽनुस्वारोऽर्धमात्राकालो भवति तेन अपामित्यस्याऽऽकारात्परस्य मकारस्यानुस्वारस्यार्द्धमात्राप्रदर्शको ह्रस्वो गुंकारोऽत्र ज्ञेयः। एवं अपाᳫंरसस्य। रजाᳫंसि, प्रजायाᳫंरायस्पोषम्।

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४१५५३५०

यत्त्वाजुष्टृंतमम् ॥ ३ ॥ ग्रहाँऽऊर्ज्जाहुतयः ॥ ग्रहाँऽऊर्ज्जाहुत
योव्व्यन्तोव्विप्प्रायमतिम् ॥ तेषांव्विशिप्प्रियाणांव्वोहमिषमूर्ज्जं
समंग्ग्रभमुपयामगृहीतोसीन्द्रायत्त्वाजुष्टङ्गृह्णाम्म्येषतेयोनि
रिन्द्रायत्त्वाजुष्टृंतमम् ॥ सम्पृचौस्त्थःसम्माभद्रेणपृङ्क्तंव्विपृचौ
स्त्थोव्विमांपाप्मनापृङ्क्तम् ॥ ४ ॥ [४-१] इन्द्रस्यव्वज्ज्रं÷ ॥
इन्द्रस्यव्वज्ज्रोसिव्वाजसास्त्वयायंव्वाजꣳसेत् ॥ व्वाजस्यनुप्प्र २२१
सवेमातरंम्महीमदितिन्नामव्वचसाकरामहे ॥ यस्यामिदंव्विश्व

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

म्भुवनमाविवेशतस्यान्नोदेवश्सविताधर्म्मसाविषत् ॥ ५ ॥
अप्प्स्वन्तश्॥ अप्प्स्वन्तरमृतमप्प्सुभेषजमपामुतप्प्रशस्त्तिष्ष्व
श्श्वाभवतव्वाजिनं÷॥ देवीरापोयोवऽऊर्म्मिश्प्प्रतूर्त्तिःकुकुन्मां
न्वाजसास्त्तेनायंव्वाजᳬसेत् ॥ ६ ॥ व्वातोवा ॥ व्वातोवामनो
वागन्धर्व्वाश्सप्तविᳬशतिः ॥ तेऽअग्ग्रेश्श्वमयुञ्जँस्त्तेऽअस्म्मि
ञ्जवमादधुः॥ ७॥ व्वातरᳬहाभव । व्वाजिन्न्युज्ज्यमानऽइन्द्र ॥७६॥
स्येवदक्षिणःश्श्रियैधि॥ युञ्जन्तुत्त्वामरुतोव्विश्श्ववेदसऽआतेत्त्व

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

ष्ट्वांपुत्त्सुजवन्दंधातु॥८॥ जवोयश्॥ जवोयस्त्तेंव्वाजिन्निहितो
गुहायश्श्श्येनेपरींत्तोऽअचंरच्चव्वातें॥ तेनंनोव्वाजिन्बलंव्वान्ब
लेंनव्वाजजिच्चभवसमंनेचपारयिष्ष्णुश्॥ व्वाजिंनोव्वाजजितो
व्वाजᳬंसरिष्ष्यन्तोब्बृहस्प्पतेंर्भागमवंजिग्घ्रत॥९॥ [५-२]
देवस्याहम्॥ देवस्याहᳬंसंवितुश्सवेसत्त्यसंवसोब्बृहस्प्पतेंरुत्त
मन्नाकंᳬंरुहेयम्॥ देवस्याहᳬंसंवितुश्सवेसत्यसंवसऽइन्द्रंस्यो २३१
त्तमन्नाकंᳬंरुहेयम्॥ देवस्याहᳬंसंवितुश्सवेसत्त्यप्प्रंसवसो

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

बृहस्प्पतैरुत्तमन्नाकंमरुहम् ॥ देवस्याहꣳसवितुश्सवेसत्त्यप्प्र
सवसऽइन्द्रस्योत्तमन्नाकंमरुहम् ॥ १० ॥ बृहस्प्पतेर्व्वाजम् ॥
बृहस्प्पतेर्व्वाजञ्जयबृहस्प्पतयेव्वाचंव्वदतबृहस्प्पतिंव्वाजञ्जाप
यत ॥ इन्द्रव्वाजञ्जयेन्द्रायव्वाचंव्वदतेन्द्रंव्वाजञ्जापयत ॥११॥
एषावः ॥ एषावꣳसासत्त्यासंव्वागभूद्ययाबृहस्प्पतिंव्वाजम
जीजपताजीजपतबृहस्प्पतिंव्वाजंव्वनस्प्पतयोव्विमुञ्चद्ध्वम् ॥
एषावꣳसासत्त्यासंव्वागभूद्ययेन्द्रंव्वाजमजीजपताजीजपतेन्द्रं

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

व्वाजंव्वनस्प्पतयोव्विमुंञ्चयद्ध्वम् ॥१२॥ देवस्याहम्॥ देवस्याहᳬ सवितुश्सवेसत्त्यप्प्रसवसोब्बृहस्प्पतेर्व्वाजजितोव्वाजञ्जेषम् ॥ व्वाजिनोव्वाजजितोद्ध्वनस्क्कभ्नुवन्तोयोजनामिमानाᳬकाष्ठां ङ्गच्छत ॥ १३ ॥[१] एषस्य[१] ॥ एषस्यव्वाजीक्षिपणिन्तुरण्ण्यति ग्ग्रीवायाम्बद्धोऽअपिकक्षऽआसनि ॥ क्क्रतुन्दधिक्क्राऽअनुसᳬसनिष्ष्यदत्त्पथामङ्काᳬस्यन्वापनीफणत्स्वाहा ॥ १४ ॥

१ एषः स्यः वाजी । अत्र स्य एव च (शु.य.प्रा.३ अ.१७सू.) इति सूत्रेण खपरे व्यञ्जने एष इत्यस्य विसर्गस्य लोपः । तथैव स्य इत्यस्य वाजी-भविते वकारे व्यञ्जने परे विसर्जनीयस्य लोपः । तेन एषस्यवाजी । अत्र लोपागमविकारप्रकृतिभावानां चतुर्णां सन्धीनां मध्येऽयं लोपनामा सन्धिर्विज्ञेयः ।

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४१५५३५०

उतस्म्मं ॥ उतस्म्मास्युद्द्र्वतस्त्तुरण्ण्यतश्पुण्र्णन्नवेरनुंवातिप्प्र
गर्द्धिनं ÷ ॥ श्येनस्यैवुद्धजंतोऽअङ्कुसम्परिंदधिक्राव्ण्णं ÷
सहोर्ज्जातारिंत्त्रतुंस्वाहा ॥ १५ ॥ शन्नं ÷ ॥ शन्नोभवन्तुव्वा
जिनोहुवेषुदेवतातामितद्द्रवंस्वक्काः ॥ जम्भयन्तोहिंव्वृकुं
रक्षांठंसिसनेम्म्यस्म्मद्युंयवुन्नमीवाः ॥ १६ ॥ तेनं ÷ ॥ तेनोऽ
अर्व्वन्तोहवनश्श्रुतोहवंव्विश्र्वेशृण्ण्वन्तुव्वाजिनोमितद्द्रवं ॥ सह
स्त्रसामेधसातासनिष्ष्यवोमहोयेधनंसमिथेषुजभ्रिरे ॥ १७ ॥

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

वाजेवाजेवत । वाजिनोनोधनेषुविप्प्राऽअमृताऽऋतज्ञाः ॥
अस्यमद्ध्वः पिबतमादयंद्ध्वन्तृप्प्तायातपथिभिर्द्देवयानैः ॥ १८ ॥
आमा ॥ आमावाजस्यप्प्रसवोजगम्म्यादेमेद्यावापृथिवीविश्श्व
रूपे ॥ आमागन्ताम्पितरामातराचामासोमोऽअमृतत्त्वेनग
म्म्यात् ॥ वाजिनोवाजजितोवाजꣳससृवाꣳसोबृहस्प्पते
र्भागमवजिग्घ्रतनिमृजानाः ॥ १९ ॥ [१०-३] आप
सं. १४ येस्वाहा । स्वापयेस्वाहापिजायस्वाहाक्क्रतवेस्वाहावसवेस्वाहा २३५

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

हुर्प्पतयेस्वाहाह्नेमुग्ग्धायस्वाहांमुग्ग्धायवैनक्ष्शिनायस्वाहांवि
नक्ष्शिनऽआन्त्यायनायस्वाहान्त्यायभौवनायस्वाहाभुवनस्य
पतयेस्वाहाधिपतयेस्वाहा ॥ २० ॥ आयुर्य्यज्ञेन । कल्प
ताम्प्राणोयज्ञेनकल्पताञ्चक्षुर्य्यज्ञेनकल्पताᳬश्रोत्रँय्यज्ञेन
कल्पताम्पृष्ठँय्यज्ञेनकल्पताँय्यज्ञोयज्ञेनकल्पताम् ॥ प्रजा
पतेक्ष्प्रजाऽअभूमस्वर्द्देवाऽअगन्म्मामृताऽअभूम ॥ २१ ॥ ॥ ७९ ॥

१ अहर्प्पतये। अत्र समानपदे च (शु. य. प्रा. ३ अ. ३० सू.) इत्यनेन सकारे प्राप्ते, अहःपतौ रेफम् (शु. य. प्रा. ३ अ. ३९ सू.) इत्यनेन पतिशब्दे परे अहरित्यस्य विसर्जनीयस्य रेफः। तत ऊष्मान्तस्थान्त्यश्च स्पर्शः (शु. य. प्रा. ४ अ. १०२ सू.) इत्यनेन पकारस्य द्वित्वम्।

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

अस्म्मेवं÷ ॥ अस्म्मेवोऽअस्त्विन्द्रियमस्म्मेनृम्म्णमुतक्क्रतुर
स्म्मेव्वर्च्चाᳬंसिसन्तुवः ॥ नमोमात्रेपृथिव्यैनमोमात्रेपृथि
व्याऽइयन्तेराड्यन्तासियमनोद्ध्रुवोसिधरुणं÷ ॥ कृष्ष्यैत्त्वा
क्षेमायत्त्वारय्यैत्त्वापोषायत्त्वा ॥ २२ ॥ [३-४] व्वाज
स्येमम् ॥ व्वाजस्येमम्प्रंसवश्सुषुवेग्ग्रेसोमᳪराजानमोषधीष्ष्व
प्प्सु ॥ ताऽअस्म्मब्भ्यम्मधुमतीर्ब्भवन्तुव्वयᳪराष्ट्रेजागृयाम
पुरोहिताःस्वाहा ॥ २३ ॥ व्वाजस्येमाम् ॥ व्वाजस्येमाम्प्रंसवश्शि २३७

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

श्रियेदिवमिमाचुविश्वाभुवनानिसम्म्राट् ॥ अदित्त्सन्तन्दा
पयतिप्प्रजानन्त्सनोरयिꣳसर्व्ववीरन्नियच्छतुस्वाहा ॥ २४ ॥
व्वाजस्यनु । प्प्रसवऽआबभूवेमाचुविश्वाभुवनानिसुर्व्वतः ॥
सनेमिराजापरियातिविद्वान्प्रजाम्पुष्टिंव्वुर्द्धयमानोऽअस्मेस्वा
हा ॥ २५ ॥ सोमुꣳराजानम् । सोमुꣳराजानुमवसेग्निमु
न्वारभामहे ॥ आदित्त्यान्विष्णुꣳसूर्य्यम्ब्रह्माणञ्चबृहुस्प
तिꣳस्वाहा ॥ २६ ॥ अर्य्यमणम्बृहुस्पतिम् ॥ अर्य्यमण

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

म्बृहुस्प्पातिमिन्द्रुन्दानायचोदय ॥ व्वाचंव्विष्ण्णुह्सरंस्वतीॅंठं सवितारंञ्चव्वाजिनुॅंठंस्वाहा ॥ २७ ॥ अग्नेऽअच्छं ॥ अग्नेऽ अच्छावदेहनह्प्प्रतिनह्सुमनाभव ॥ प्रनोयच्छसहस्त्रजित्त्वॅंठं हिधनदाऽअसिस्वाहा ॥ २८ ॥ प्रनं÷ ॥ प्रनोयच्छत्त्वर्य्युमा प्प्रपुषाप्प्रब्बृहुस्प्पतिं÷ ॥ प्रवाग्ग्देवीदंदातुनह्स्वाहा ॥२९॥ देुव स्यंत्त्वा । सवितुश्प्प्रसवेश्विनोर्बाहुब्भ्याम्पुष्ण्णोहस्त्ताब्भ्याम् ॥

---

१ प्रनो यच्छत्वर्यमा । अत्र ऋपरेभ्यो नकारो णकारॅं समानपदे (शु. य. प्रा. ३ अ. ८४ सू.) इत्यनेन ऋकारषकाररेफेभ्य उत्तरो नकारो णकारमापद्यते समानपदे । अनेन समानपदे णत्वविधानादत्र प्र नो इति पदयोः समानपदत्वाभावान्न णत्वम् ।

२३१

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

सरस्वत्यै॒ वा॒चोयुन्तु॒र्य्यन्त्रि॒यैदधामि॒ बृह॒स्पतैष्ट्वा॒साम्म्रा॑ज्ज्येना॒
भिषि॑ञ्चाम्म्यसौ ॥ ३० ॥ [८-५] अ॒ग्निरेका॑क्षरेण । प्प्रा॒णमुद॑
जयत्त॒मु॒ज्जैष॒म॒श्विनौ॒ द्व्य॑क्षरेण॒ द्वि॒पदो॒ मनु॒ष्या॒ नु॒दजयतान्ता
नु॒ज्जैषं॒ विष्णु॒स्त्र्य॑क्षरेण॒ त्रीँल्लो॒कानु॒दजयत्तानु॒ज्जैष॒ꣳ सोम॒श्चतु॑र
क्षरेण॒ चतु॑ष्पदः प॒शूनु॒दजयत्तानु॒ज्जैषम्पू॒षा पञ्चा॑क्षरेण ॥ ३१ ॥

पू॒षा पञ्चा॑क्षरेण ॥ पू॒षा पञ्चा॑क्षरेण॒ पञ्च॒ दिश॒ऽउदजयत्ताऽउज्जैं

१ अभिषिञ्चामि । अत्र अभेश्च (शु. य. प्रा. ३ अ. ६५ सू.) इत्यनेन अभेः परस्य सिञ्चामीतिपदघटितस्य सकारस्य षत्वे रूपम् ।

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

षꣳसविताषडक्षरेणषड्ढृतूनुदजयत्तानुज्जैषम्मरुतः सप्ताक्षरे
णसप्तग्ग्राम्म्यान्पशूनुदजयँस्तानुज्जैषम्बृहस्पतिरष्टाक्षरेण
गायत्रीमुदजयत्तामुज्जैषम्मित्रोनवाक्षरेण ॥ ३२ ॥ मित्रो
नवाक्षरेण । त्रिवृतꣳस्तोममुदजयत्तमुज्जैषंव्वरुणोदशाक्षरेण
व्विराजमुदजयत्तामुज्जैषमिन्द्रऽएकादशाक्षरेणत्रिष्टुभमुदज
यत्तामुज्जैषंव्विश्वेदेवाद्वादशाक्षरेणजगतीमुदजयँस्तामुज्जैषंव्व २५१
सवस्त्रयोदशाक्षरेण ॥ ३३ ॥ व्वसवस्त्रयोदशाक्षरेण । त्रयोद

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

शꣳस्तोममुदजयँस्तमुज्जेष꣡रुद्राश्चतुर्द्दशाक्षरेणचतुर्द्दशꣳ
स्तोममुदजयँस्तमुज्जेषमादित्याꣳपञ्चदशाक्षरेणपञ्चदशꣳस्तो
ममुदजयँस्तमुज्जेषमदितिꣳषोडशाक्षरेणषोडशꣳस्तोममुद
जयत्तमुज्जेषम्प्रजापतिꣳसप्तदशाक्षरेणसप्तदशꣳस्तोममुद
जयत्तमुज्जेषम् ॥ ३४ ॥ [४-६] एषते । निर्ऋतेभागस्त
ञ्जुषस्वस्वाहाग्निनेत्रेभ्योदेवेभ्यः पुरःसद्भ्यःस्वाहायमनेत्रे

१ अदितिꣳषोडशा । अत्र प्रत्ययसवर्णम्मुदि शाकटायनः (शु. य. प्रा. ३ अ. ९ सू.) इति विसर्गस्य परसवर्णे प्राप्ते अविकारं शाकल्यः शषसेषु (शु. य. प्रा. ३ अ. १० सू.) इत्यनेन परसवर्णनिषेधाद्विसर्ग एव । लोपागमविकारप्रकृतिभावानां चतुर्णां सन्धीनां मध्ये प्रकृतिभावाख्योऽयं सन्धिः ।

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

ब्भ्योदेवेब्भ्योदक्षिणासद्भ्युꣳस्वाहाविश्वदेवनेत्रेब्भ्योदेवेब्भ्यः
पश्चात्सद्भ्युꣳस्वाहामित्रावरुणनेत्रेब्भ्योवामरुन्नेत्रेब्भ्योवादेवे
ब्भ्यऽउत्तरासद्भ्युꣳस्वाहासोमनेत्रेब्भ्योदेवेब्भ्यऽउपरिसद्भ्योदुव
स्वद्भ्युꣳस्वाहा॥३५॥ येदेवाः॥ येदेवाऽअग्निनेत्राꣳपुरꣳसदस्ते
ब्भ्युꣳस्वाहायेदेवायमनेत्रादक्षिणासदस्तेब्भ्युꣳस्वाहायेदेवा
विश्वदेवनेत्राꣳपश्चात्सदस्तेब्भ्युꣳस्वाहायेदेवामित्रावरुणने २४३
त्रावामरुन्नेत्रावोत्तरासदस्तेब्भ्युꣳस्वाहायेदेवाःसोमनेत्राऽ

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

उपरिसदोद्दुवस्वन्तस्त्तेभ्यस्स्वाहा ॥ ३६ ॥ अग्नेसहस्व ॥
अग्नेसहस्वपृतनाऽअभिमातीरपास्य ॥ दुष्टरस्त्तरन्नरातीर्व्वर्च्चो
धायज्ञवाहसि ॥ ३७ ॥ देवस्यत्त्वा । सवितुःप्प्रसवेश्विनो
र्ब्बाहुभ्याम्पूष्णोहस्त्ताभ्याम् ॥ उपाꣳशोर्व्वीर्य्येणजुहोमि
हतꣳरक्षस्स्वाहारक्षसान्त्वाब्बधायावधिष्मरक्षोवधिष्मामु
मसौहतः ॥ ३८ ॥ [४-७] सवितात्त्वा । सवानाꣳसुवता

१ उपरिसदः । अत्र भाविभ्यः सः र्ष समानपदे (शु. य. प्रा. ३ अ. ७६ सू.) इत्यनेन षत्वप्राप्तौ पृथिविदिव्युपरिचर्षणिशकुनियासिभ्यः (शु. य. प्रा. ३ अ. ८४ सू.) इत्यनेन उपरिशब्दात्परस्य सदः इत्यस्य सस्य प्रकृतिभावे जाते न षत्वम् ।

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

मग्निर्गृहपतीनाᳫं सोमो वनस्पतीनाम् ॥ बृहस्पतिर्वाचऽ
इन्द्रो ज्यैष्ठ्याय रुद्रः पशुभ्यो मित्रः सत्यो वरुणो धर्म्मपतीना
म् ॥ ३९ ॥ इमन्देवाᳫं ॥ इमन्देवाऽअसपत्नᳫं सुवद्ध्वम्महते
क्षत्राय महते ज्यैष्ठ्याय महते जानराज्यायेन्द्रस्येन्द्रियाय ॥
इममुष्ष्यै पुत्रममुष्ष्यै पुत्रमस्यै विशऽएष वोमी राजा सोमो
स्म्माकं ब्राह्मणानाᳫं राजा ॥ ४० ॥ [२-८] ॥ इतिश्रीवाज
सनेयसंहितायां नवमोऽध्यायः ॥ ९ ॥

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

॥ श्रीवेदपुरुषायनमः ॥ अनुवाकसूत्रम् ॥ अपोदेवाश्चतस्रः, सोमस्यत्विषिः पञ्च, वेष्टादन्दशूकाः सप्त, सोमस्यत्वाचतस्र, ऽइन्द्रस्यवज्रः पञ्च, स्योनासिचतस्रः, सवित्राप्रसवित्रैका, श्विभ्यांपच्यस्वचतस्रो, ष्टौचतुस्त्रिꣳशत् [अ. १० मं. ३४ अनु. ८] हरिः ॐ ॥ अपोदेवा ॥

अपोदेवामधुमतीरगृभ्णन्नूर्ज्जस्वतीराजसुश्चितानाः ॥ याभिर्म्मित्रावरुणावभ्यषिञ्चन्याभिरिन्द्रमनयन्नत्यरातीः ॥ १ ॥

१ अन्वषिञ्चन् । अभि असिञ्चन् । इति द्वे पदे अत्र अनेन (शु. ३ अ. ९५ सू.) अनेरपसर्गात्परस्य सिञ्चतेः सकारः षकारमापद्यते संहितायाम् । इति सूत्रेणनाऽसिञ्चन्पदघटितसकारस्य व्यवधानेन षत्वाप्राप्तौ अभ्यवहितोऽपि (शु. य. प्रा. ३ अ. ६६ सू.) इत्यनेन व्यवधानेऽपि षकारे कृतम् ।

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४१५५३५०

वृष्ण्णंऽऊर्म्मिः॥ वृष्ण्णंऽऊर्म्मिरंसिराष्ट्रदाराष्ट्रम्मेंदेहिस्वाहा
वृष्ण्णंऽऊर्म्मिरंसिराष्ट्रदाराष्ट्रम्मुष्म्मैंदेहिवृषसेनोऽसिराष्ट्रदारा
ष्ट्रम्मेंदेहिस्वाहावृषसेनोऽसिराष्ट्रदाराष्ट्रममुष्म्मैंदेह्यर्त्थेतंस्त्थ
॥ २ ॥ अर्त्थेतंस्त्थ। राष्ट्रदाराष्ट्रम्मैंदत्तस्वाहार्त्थेतंस्त्थराष्ट्र
दाराष्ट्रममुष्म्मैंदत्तौजंस्वतीस्त्थराष्ट्रदाराष्ट्रम्मेंदत्तस्वाहौजंस्व
तीस्त्थराष्ट्रदाराष्ट्रममुष्म्मैंदत्तापंःपरिवाहिणींस्त्थराष्ट्रदाराष्ट्र २४७
वितेभ्य÷सर्प्पेभ्योनम÷ ॥ ६ ॥ याऽइषवः ॥ याऽइषवो
यातुधानानाँय्येवावनस्प्पतीँ१॥रनु ॥ येवावटेषुशेरतेतेभ्य÷
सर्प्पेभ्योनमः ॥ ७ ॥ येवा ॥ येवामीरोचनेदिवोयेवा

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

सूर्य्यस्यरश्मिमषुं ॥ येषामुप्सुसंदस्कृतन्तेभ्यः सर्प्पेभ्योन मः ॥ ८ ॥ कृणुष्ष्वपाजः ॥ कृणुष्ष्वपाजःप्प्रसितिन्नपृत्थ्वीं

य्याहिराजेवामंवाँ२॥ऽइभेन ॥ तृष्ष्वीमनुप्प्रसितिन्द्रूणानो स्तासिविद्ध्यरक्षसस्तपिंष्ठैः ॥ ९ ॥ तवंभ्रमासः ॥ तवंभ्र मासऽआशुयापंतन्त्यनुंस्प्पृशधृषताशोशुंचानः ॥ तपूंष्य

---

१ सदस्कृतम् । अत्र सदोर्बार्नमस्कृतभ्पिता पथेषु (शु. य. प्रा. ३ अ. ३४ सू.) इत्यनेन यथासंख्यं सदः बर्हिः नमः एतेषां विसर्जनीयसंबन्धिनः सस्य क्रमेण कृतं पिता पथः एतेषु पदेषु परेषु षकारः । एवं षकारे कृते ऊष्मान्तस्थान्यश्च स्पर्शः (शु. य. प्रा. ४ अ. १०२ सू.) इत्यनेन ककारस्य द्वित्वे प्राप्ते ऽत्वर्णो (शु. य. प्रा. ४ अ. ११३ सू.) इत्यनेन ककारस्य द्वित्वनिषेधः ।

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

ग्ग्नेजुह्वापतङ्गानसान्दितोव्विसृजव्विष्ष्वगुल्काः॥ ॥ १० ॥ प्रति
स्प्पशं÷ ॥ प्रतिस्प्पशोव्विसृजतूर्ण्णितमोभवापायुर्व्विशोऽअ
स्याऽअदब्धः ॥ योनोदूरेऽअघशᳬसोयोऽअन्त्यग्ग्नेमाकिष्टे
व्यथिरादधर्षीत् ॥ ११ ॥ उदग्ग्ने । तिष्ठप्प्रत्त्यातनुष्ष्वन्न्यु
मित्राँ२॥ऽओषतात्तिग्ग्महेते ॥ योनोऽअरातिᳬसमिधानच
क्रेनीचातन्धक्क्ष्यतसन्नशुष्क्कम् ॥१२॥ ऊर्द्ध्वोभव ॥ ऊर्द्ध्वोभव ॥ १२७ ।
प्प्रातिविद्ध्याद्ध्यस्म्मदाविष्क्कृणुष्ष्वदैव्यान्न्यग्ग्ने ॥ अवस्त्थिरा ३३२

१ माकिष्टे। अत्र वृन्दारुर्माकिः (शु. प्रा. ३ अ. ७४ सू.) इत्यनेन विसर्गस्य सस्य परत्वे द्वित्वे रूपम्।

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४१५५३५०

तंनुहियातुजूनांज्ञामिमजामिम्प्रमृंणीहिशत्रून् ॥ अग्ग्नेष्ट्वा
तेजंसासादयामि ॥ १३ ॥ अग्निर्म्मूर्द्धा । दिवश्ककुत्त्पतिः
पृथिव्याऽअयम् ॥ अपाठंरेताठंसिजिन्वति ॥ इन्द्रंस्यत्त्वौजं
सासादयामि ॥ १४ ॥ भुवोयज्ञस्यं ॥ भुवोयज्ञस्यरजंसश्चने
तायत्रांनियुद्भिंह्सचसेशिवाभिंः ॥ दिविमूर्द्धानंन्दधिषेस्वर्षा
जिह्वामंग्ग्नेचकृषेहव्यवाहंम् ॥ १५ ॥ [१५-१] ध्रुवासिं ।
धरुणास्तृंताविश्श्वकर्म्मणा ॥ मात्त्वांसमुद्रऽउद्धंधीन्मासुप

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

णर्णोद्ध्यंथमानापृथिवीन्दृंᳪह ॥ १६ ॥ प्रेजापतिष्ट्वा । साद ॥ १३ ॥
॥१२८॥ यत्त्वपाम्पृष्ठेसंमुद्रस्येमंन् ॥ व्यचंस्वतीम्प्रथंस्वतीम्प्रथंस्वपृथि
व्यसि ॥ १७ ॥ भूरंसि ॥ भूरंसिभूमिंरस्यदिंतिरसिविश्वधाया
विश्वंस्यभुवंनस्यधुर्त्री ॥ पृथिवीँय्यंच्छपृथिवीन्दृंᳪहपृथिवी
म्माहिंᳪसीः ॥ १८ ॥ विश्वंस्म्मैप्प्राणायं ॥ विश्वंस्म्मैप्प्रा
णायांपानायंव्यानायौंदानायंप्प्रतिष्ठायैंचरित्रांय ॥ अग्निष्ट्वा ॥ १२८ ॥

१ प्रजापतिष्ट्वा । सकारपरे च (शु. य. प्रा. ३ अ. ७८ सू.) इत्यनेन सकारः परो यस्मादेकाक्षरात्तस्मैकाक्षरे प्रत्यये विसर्जनीयसकारस्य षत्वम् । अत्र प्रजापतिशब्दे पाधातोः पतिशब्दस्य तस्य षकारे कृत्वे द्वित्वे रूपम् ।

भिपातुमह्यास्वस्त्याच्छर्दिषाशन्तमेनतयादेवतयाङ्गिरस्वद्ध्रु
वासीद ॥ १९ ॥ काण्डात्काण्डात्प्ररोहन्ती ॥ काण्डा
त्काण्डात्प्ररोहन्तीपरुषःपरुषस्परि ॥ एवानोदूर्वेप्प्रतनुस
हस्रेणशतेनच ॥ २० ॥ याशतेन । प्रतनोषिसहस्रेणविरो
हसि ॥ तस्यास्तेदेवीष्टकेविधेमहविषावयम ॥ २१ ॥ यास्ते ॥
यास्तेऽअग्नेसूर्य्येरुचोदिवमातन्वन्तिरश्मिभिः ॥ ताभि

१ परुषः परुषस्परि। अत्र समानपदे च (शु. य. प्रा. ३ अ. ३० सू.) इत्यनेन सकारे प्राप्ते न परुषः परुषि (शु. य. प्रा. ३ अ. ३७ सू.) इत्यनेन परुषि परे पूर्वपरुषशब्दघटितविसर्जनीयस्य सकारो निषिध्यते। अतो न सकारः किन्तु विसर्ग एव।

३३५

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

न्नोऽअद्यसर्व्वाभीरुचेजनायनस्कृधि ॥ २२ ॥ यार्व÷ ॥ या
॥१२९॥ वोदेवाःसूर्य्येरुचोगोष्ष्वश्श्वेषुयारुचं÷ ॥ इन्द्राग्नीताभिःस ॥ १३
र्व्वाभीरुचन्नोधत्तबृहस्पते ॥ २३ ॥ व्विराड्ज्योति÷ ॥ व्वि
राड्ज्योतिरधारयत्स्वराड्ज्योतिरधारयत् ॥ प्रजापतिष्ट्वासा
दयतुपृष्ठेपृथिव्याज्ज्योतिष्मतीम् ॥ व्विश्श्वस्मैप्प्राणायापाना
यव्यानायव्विश्श्वञ्ज्योतिर्य्यच्छ ॥ अग्निष्टेधिपतिस्तयादेवत ॥१२९॥

१ अग्निष्टे । अग्निस्ते इति पदम् । अत्र वायुरग्निरोरेकाक्षरे (शु. य. प्रा. ३ अ. ७७ सू.) इत्यनेन एकाक्षरे ते पदे परे अग्निशब्दघटितस्य सस्य षत्वे कृते ऊष्मान्तस्थाभ्यश्च स्पर्शः (शु. य. प्रा. ४ अ. १०२ सू.) इत्यनेन टस्य द्वित्वम् ।

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४१५५३५०

याङ्गिरस्वद्ध्रुवासीद ॥ २४ ॥ मधुश्च ॥ मधुश्चमाधवश्चवास
न्तिकावृतूऽअग्नेरन्तःश्लेषोसिकल्पेतान्द्यावापृथिवीकल्प
न्तामापऽओषधयःकल्पन्तामग्नयः पृथङ्ममज्यैष्ठ्यायस
व्रताः ॥ येऽअग्नयःसमनसोन्तराद्यावापृथिवीऽइमे ॥ वास
न्तिकावृतूऽअभिकल्पमानाऽइन्द्रमिवदेवाऽअभिसंविशन्तु
तयादेवतयाङ्गिरस्वद्ध्रुवेसीदतम् ॥ २५ ॥ अषाढासि ॥ अषा ३३७

१ अभिसंविशन्तु । अत्र भाविभ्यः सः षं समानपदे (शु. य. प्रा. ३ अ. ५६ सू.) अनेन प्राप्तस्य षकारस्य अनुसन्तरोतुबृहस्पतिसुतस्यसुसमिन्द्राय-सुसन्दशमभिसत्वाऽभिसंविशन्तु० (शु. य. प्रा. ३ अ. ८२ सू.) इत्यनेन प्रकृतिभावे षत्वाभावः ।

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

ढासिसहमानासहुस्वारातीःसहस्वपृतनायतः ॥ सहस्त्रंवीर्ज्या
सिसामांजिन्व ॥ २६ ॥ [११-२] मधुव्वाताः ॥ मधुव्वाताऽऋ
तायुतेमधुंक्क्षरन्तिसिन्धंवः ॥ माद्ध्वीर्न्नःसन्त्वोषंधीः ॥ २७ ॥
मधुनक्तम् ॥ मधुनक्तमुतोषसोमधुंमत्त्पात्थिवꣳरजः ॥ म
धुद्यौरंस्त्तुनःपिता ॥ २८ ॥ मधुंमान्नः ॥ मधुंमान्नोव्वनस्प्पति
र्म्मधुंमाँ२॥ऽअस्त्तुसूर्य्यः ॥ माद्ध्वीर्ग्गावोभवन्तुनः ॥ २९ ॥
अपाङ्गम्भन् ॥ अपाङ्गम्भंन्त्सीदुमात्त्वासूर्य्योभिताप्प्सीन्माग्

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

ग्निर्व्वैश्वानरः ॥ अच्छिन्नपत्त्राꣳ प्रजाऽअनुवीक्क्षस्वानुत्त्वादि
व्याद्वृष्टिः सचताम् ॥ ३० ॥ त्रीन्त्समुद्द्रान् ॥ त्रीन्त्समुद्द्रा
न्त्समसृपत्त्स्वर्ग्गानपाम्पतिर्व्वृषभऽइष्टकानाम् ॥ पुरीषंव्वसानꣳ
सुकृतस्यलोकेतत्त्रगच्छयत्त्रपूर्व्वेपरेताꣳ ॥ ३१ ॥ महीद्यौः ।
पृथिवीचनऽइमँय्यज्ञम्मिमिक्क्षताम् ॥ पिपृतान्नोभरीमभिꣳ
॥ ३२ ॥ व्विष्णोꣳकर्म्माणि । पश्श्यतयतोव्व्रतानिपस्पशे ॥ ३३१
इन्द्रस्ययुज्ज्यꣳसखा ॥ ३३ ॥ ध्रुवासि । धरुणेतोजज्ञेप्रथम

pdf by कृष्णाशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

मेऽभ्योयोनिंऽभ्योऽअधिजातवेंदाः ॥ सगायुत्र्यात्रिष्टुभानुष्टु
॥१३१॥ भाचदेवेऽभ्योहुव्यंव्वहतुप्प्रजानन् ॥ ३४ ॥ इषेराये । रंम ॥ १२ ।
स्वसहंसेद्युम्म्नऽऊर्ज्जेंऽअपत्त्याय ॥ सम्म्राडंसिस्वुराडंसिसार
स्वतौत्त्वोत्त्सौप्प्रावंताम् ॥३५॥ अग्ग्नेयुक्क्ष्व ॥ अग्ग्नेयुक्क्ष्वाहि
येतवाश्श्वासोदेवसाधवंः ॥ अरंव्वहंन्तिमन्न्यवें ॥ ३६ ॥
युक्क्ष्वाहि । देवुहूतमाँ२॥ऽअश्श्वाँ२॥ऽअग्ग्नेरुथीरिंव ॥ निहोता ॥ १३१
पूर्व्व्यश्सदः ॥ ३७ ॥ [११-३] सम्म्यक्स्रवन्ति । सरितो

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

नधेनाऽअन्तर्हृदामनसापूयमानाः ॥ घृतस्यधाराऽअभिचाक
शीमिहिरण्ण्ययोंव्वेतसोमद्धौऽअग्ग्नेः ॥ ३८ ॥ रुचेत्त्वा ।
रुचेत्त्वांभासेत्त्वाज्ज्योतिषेत्त्वा ॥ अभूदिदंव्विश्श्वस्यभुवनस्य
व्वाजिनमग्ग्नेर्व्वैश्वानरस्यंच ॥ ३९ ॥ अग्ग्निर्ज्ज्योतिषा ॥
अग्ग्निर्ज्ज्योतिषाज्ज्योतिष्म्मान्रुक्क्मोव्वर्च्चसाव्वर्च्चस्वान् ॥ सहस्र
दाऽअंसिसहस्रायत्त्वा ॥ ४० ॥ आदित्त्यङ्गर्ब्भम् ॥ आदित्त्य

१ यत्र रकारपरस्य हकारपरस्य च स्पर्शवर्णस्य द्वित्वं तत्र ऊष्मान्तस्थाभ्यश्च स्पर्शः (शु. य. प्रा. ४ अ. १०२ सू.) इत्यनेन ज्ञेयम्। अस्य परं तु रेफहकाराभ्याम् इत्यनेन विधीयमानस्य द्वित्वस्यापवादभूतत्वात्। यथा संवर्च्चसा। गर्ब्भम्। पार्त्थिवम्। चक्षुर्म्मित्रस्य। अग्निर्ज्योतिषा।

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४१५५३५०

ङ्गर्भम्पयसासमाङ्गिसहस्रस्यप्प्रतिमांविश्वरूपम् ॥ परिवृङ्धि
हरंसामाभिमंस्थाःशतायुषङ्कृणुहिचीयमानः ॥४१॥ वात
स्यजूतिं । वरुणस्यनाभिमश्वंञ्जज्ञानंसरिरस्यमद्ध्ये ॥ शिशु
न्नदीनांहरिमद्रिबुद्ध्नमग्नेमाहिंसीःपरमेव्योमन् ॥४२॥
अजस्रमिन्दुम् ॥ अजस्रमिन्दुमरुषम्भुरण्ण्युमग्निमीडे

१ मंस्थाः । अत्र संयोगाद्यश्च यो भवेत् । (या. शि.) यत्र संयोगाद्योऽनुस्वारो मात्रिको द्विमात्रिको वा वर्णो भवेत्तत्र तद्वर्णस्य अनादिगं संयोगाद्यं वर्जयित्वा ह्रस्व एव बोध्यः । संयोगात्पूर्वः संयोगपूर्वः इति समासः । अत्र नानुस्वारः (शु. य. प्रा. ४ अ. १०९ सू.) लिङ्गम् । २ वर्णे तु मात्रिके पूर्वे अनुस्वारो द्विमात्रिकः । (या. शि.) मात्रिकेऽ (ह्रस्ववर्णपूर्वे) नुस्वारे सो द्विमात्रिको लेख्यो बोध्य उच्चारणीयश्च । अत्र अनुस्वारो ह्रस्वपूर्वोऽध्यर्धमात्रा पूर्वा चार्धमात्रेति (शु. य. प्रा. ४ अ. १२८ सू.) प्रमाणम् । ३ द्विमात्रिके मात्रिकः स्यादिति (या. शि.) । यत्रानुस्वारात्पूर्ववर्णो द्विमात्रिकस्तत्र मात्रिकोऽ (ह्रस्वः ७इत्याकारकः) नुस्वारो विधेयो ह्रस्वोच्चारणीयश्च । अत्र दीर्घादर्धमात्रा पूर्वा चाध्यर्धा (शु. य. प्रा. ४ अ. १४९ सू.) लिङ्गम् ।

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४१५५३५०

पूर्व्वचित्तिन्नमोभिः ॥ सपर्व्वभिर्ऋतुशःकल्पमानोगाम्माहिꣳ
सीरदितिंव्विराजम् ॥ ४३ ॥ व्वरूत्रीन्त्वष्टुः ॥ व्वरूत्रीन्त्व
ष्टुर्व्वरुणस्यनाभिमविञ्जज्ञानाꣳरजसःपरस्म्मात् ॥ महीꣳ
साहस्रीमसुरस्यमायामग्नेमाहिꣳसीःपरमेव्योमन् ॥ ४४ ॥
योऽअग्निः ॥ योऽअग्निरग्नेरध्यजायतशोकात्पृथिव्याऽउत
वादिवस्परि ॥ येनप्रजाव्विश्वकर्म्माजजानतमग्नेहेडःपरि
तेव्वृणक्तु ॥ ४५ ॥ चित्रन्देवानाम् ॥ चित्रन्देवानामुदगाद

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

शु. य. संहि. नीकञ्चक्षुर्म्मित्रस्यव्वरुणस्याग्ग्नेः॥ आप्प्राद्यावापृथिवीऽअन्त पू. अ.
॥१३३॥ रिक्षह्ँसूर्य्यऽआत्क्माजगतस्त्तस्थुषश्श्च ॥ ४६ ॥ [९-४] ॥ १३ ॥
इमम्मा। हिᳬसीर्द्द्विपादम्पशुᳬसहस्राक्क्षोमेधायचीयमानः॥
मयुम्पशुम्मेधमग्ग्नेजुषस्वतेनंचिन्न्वानस्तन्न्वोनिषीद ॥ मयु
न्तेशुगृच्छतुयन्द्विष्ष्मस्तन्तेशुगृच्छतु ॥ ४७ ॥ इमम्मा ।
हिᳬसीरेकशफम्पशुङ्कनिक्क्रदंव्वाजिनंव्वाजिनेषु ॥ गौरमार ॥ १३३ ।

१ यत्र स्वरात्परस्य संयोगस्याद्यक्षरस्य द्वित्वं दृश्यते तत्र स्वरात्संयोगादिर्द्विरुच्यते सर्वत्र (शु. य. प्रा. ४ अ. ९८ सू.) इत्यनेन ज्ञेयम् । चिन्वानः । संव्यय-यमानः । अनित्रम् । वरुणस्याग्नेः । परश्च स संयोगः सजातीयकंठ्यतालव्यदन्त्यमूर्धन्यौष्ठ्यवर्णानां न चेत् तत्र तु द्वित्वाभाव एव यथा इमम्मा । गौरन्ते ।

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

ण्यमनुंतेदिशामितेनंचिन्वानस्तन्वोंनिषींद ॥ गौरन्तेशुगृं
च्छतुयन्द्विष्मस्तन्तेशुगृंच्छतु ॥ ४८ ॥ इमᳬसाहुस्रम् ॥
इमᳬसाहुस्रᳬशतधारमुत्सᳬंव्यच्यमानᳬसरिरस्यमद्ध्ये ॥
घृतन्दुहानामदितिञ्जनायाग्नेमाहिᳬसीःपरमेव्योमन् ॥ गव
यमारण्यमनुंतेदिशामितेनंचिन्वानस्तन्वोंनिषदि ॥ गवय
न्तेशुगृंच्छतुयन्द्विष्मस्तन्तेशुगृंच्छतु ॥ ४९ ॥ इममूर्णा
युं । वरुणस्यनाभिन्त्वचम्पशूनान्द्विपदाञ्चतुष्पदाम् ॥ त्वष्टुः

३५५

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४१५५३५०

॥१२४॥ ष्प्रजानाम्प्रथमञ्जनित्रमग्नेमाहिंꣳसीःपरमेव्योमन् ॥ उष्ट्र ॥ १३ ॥
मारण्ण्यमनुतेदिशामितेनचिन्वानस्तन्वोनिषीद ॥ उष्ट्रन्ते
शुगृच्छतुयन्द्विष्मस्तन्तेशुगृच्छतु ॥ ५० ॥ अजोहि ॥ अजो
ह्यग्नेरजनिष्टशोकात्सोऽअपश्यज्जनितारमग्रे ॥ तेनदेवादेव
तामग्रमायँस्तेनरोहमायन्नुपमेध्यासः ॥ शरभमारण्ण्यमनुते
दिशामितेनचिन्वानस्तन्वोनिषीद ॥ शरभन्तेशुगृच्छतुय ॥ १३४ ॥ ३४५
न्द्विष्मस्तन्तेशुगृच्छतु ॥ ५१ ॥ त्वँय्यविष्ठ । दाशुषोनॄँः

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४१५५३५०

पाहिशृणुधीगिरः ॥ रक्क्षातोकमुतत्क्मना ॥ ५२॥ [६-५]
अपान्त्वा ॥ अपान्त्वे[1]मन्त्सादयाम्म्युपान्त्वोद्मन्त्सादयाम्म्यु
पान्त्वाभस्म्मन्त्सादयाम्म्युपान्त्वाज्ज्योतिंषिसादयाम्म्युपा
न्त्वार्यनेसादयाम्म्यर्ण्णवेत्त्वासदनेसादयामिसमुद्रेत्त्वासदने
सादयामिसरिरेत्त्वासदनेसादयाम्म्युपान्त्वाक्षयेसादयाम्म्यु
पान्त्वासधिंषिसादयाम्म्युपान्त्वासदनेसादयाम्म्युपान्त्वासध
स्त्थेसादयाम्म्युपान्त्वायोनौसादयाम्म्युपान्त्वापुरीषेसादया ३४७

---

१ एमनि इति पदम् । लिशब्दो बहुलम् (शु. य. प्रा. ३ अ. १८ सू.) इत्यनेन क्वचित्निकारघटितेकारस्यापि लोपः । एवं लोपे एमन् भवति ।

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

म्म्युपान्त्वापार्थंसिसादयामिगायत्रेणत्त्वाच्छन्दंसासादयामि
त्रैष्टुंभेनत्त्वाच्छन्दंसासादयामिजागंतेनत्त्वाच्छन्दंसासादया
म्म्यानुष्टुभेनत्त्वाच्छन्दंसासादयामिपाङ्क्तेनत्त्वाच्छन्दंसासाद
यामि ॥ ५३ ॥ [१-६] अयम्पुरः ॥ अयम्पुरोभुवस्त्तस्यं
प्प्राणोभौवायनोव्वंसन्तःप्प्राणायनोगांयत्रीव्वासन्तीगांयत्र्यै
गांयत्रङ्गांयत्रादुंपाᳪंशुरुपाᳪंशोस्त्रिवृत्त्रिवृतोंरथन्तरंव्वसिष्ठऽ
ऋषिंः प्प्रजापतिगृहीतयात्त्वयाप्प्राणङ्गृह्णामिप्प्रजाब्भ्यः

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

॥ ५४ ॥ अयन्दक्षिणा । विश्वकर्म्मातस्यमनोवैश्वकर्म्मणङ्ग्री
ष्म्मोमानसस्त्रिष्टुब्ग्रैष्मीत्रिष्टुभःस्वारंस्वारादन्तर्य्यामोन्त
र्य्यामात्पञ्चदशःपञ्चदशाद्बृहद्भरद्वाजऽऋषिःप्रजापतिगृही
तयात्त्वयामनोगृह्णामिप्प्रजाभ्यः ॥ ५५ ॥ अयम्पश्चात् ॥
अयम्पश्चाद्विश्वव्यचास्तस्यचक्षुर्वैश्वव्यचसंवर्षाश्चाक्षु
ष्ष्योजगतीवार्षीजगत्त्याऽऋक्कसममृक्कसमाच्छुक्रःशुक्रात्सप्त ३४१
दशःसप्तदशाद्वैरूपञ्जमदग्निरृषिःप्रजापतिगृहीतयात्त्वया

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

चक्षुर्गृह्णामिप्प्रजाब्भ्यः÷ ॥ ५६ ॥ इदमुत्तरात् ॥ इदमुत्त
रात्त्स्वस्त्तस्यश्श्रोत्र६ँसौव६ँशरच्छ्रौत्र्यनुष्टुप्प्शारद्यनुष्टुभःऽऐ
डमैडान्मन्थीमन्थिनऽएकविंशऽएकविंशाद्वैराजंविश्वा[1]मि
त्रऽऋषि÷प्प्रजापतिगृहीतयात्त्वयाश्श्रोत्रङ्गृह्णामिप्प्रजाब्भ्य÷
॥ ५७ ॥ इयमुपरिमतिस्त्तस्यैव्वाङ्[2]मात्त्याहैमन्तीव्वाच्यश्प
ङ्क्तिर्हैमन्तीपङ्क्त्यैनिधनवन्निधनवतऽआग्ग्रयणऽआग्ग्रयणात्त्रि
णवत्त्रयस्त्रिंशौत्त्रिणवत्त्रयस्त्रिंशाब्भ्याᳬशाक्वररैवतेव्विश्वक ॥ १३६ ॥
र्म्मऽऋषि÷प्प्रजापतिगृहीतयात्त्वयाव्वाचङ्गृह्णामिप्प्रजाब्भ्यो ३५०
लोकन्ताऽइन्द्रम् ॥ ५८ ॥ [५-७] इतिश्रीवाजसनेयसंहितायांत्रयोदशोऽध्यायः ॥ १३ ॥

१ विश्वामित्रः । अथ नरहामित्रेषु च (शु. य. प्रा. ३ अ. १०३ सू.) इत्यनेन मित्रशब्दपरे विश्वशब्दस्य दीर्घाकारः । २ वाङ्मात्त्या इति पदद्वयम् । पञ्चमेऽपञ्चमस्य । (शु. य. प्रा. ४ अ. १२१ सू.) पञ्चमे स्वरे प्रत्यये परेऽपञ्चमः पञ्चमतापद्यते । इत्यनेन ककारस्य पञ्चमे स्वरे पञ्चमः । वाङ्मात्त्या ।

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४१५५३५०

श्रीवेदपुरुषायनमः॥

अनुवाकसूत्रम् ॥ ध्रुवक्षितिर्षट्, सजूर्ऋतुभिर्द्विका, मूर्द्धावयो द्विका, इन्द्राग्नीऽअव्यथमानाꣳषडा, युमेंषडा, शुस्त्रिवृद्देका,

१ अध्यायः १२-लोकंपृण. १ । ताऽअस्य. २ । इंद्रंविश्वाः. ३ ॥ इति प्रतीकानि ॥
५४ ५५ ५६

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

ग्नेर्भागोसिचतुष्कै,कयाचतुष्का,ष्टावेकत्रिꣳशत [अ. १४
मं. ३१ अनु. ८] ॥ हरिः ॐ ॥ ध्रुवक्षितिर्ध्रुवयोनिꣳ ॥
ध्रुवक्षितिर्ध्रुवयोनिर्ध्रुवासिध्रुवँय्योनिमासीदसाधुया ॥ उक्ख्यं
स्यकेतुम्प्रथमञ्जुषाणाश्विनांद्ध्वर्य्यूसादयतामिहत्त्वा ॥ १ ॥
कुलायिनींघृतवंती ॥ कुलायिनींघृतवंतीपुरन्धिꣳस्योनेसीदस
दनेपृथिव्याः ॥ अभित्त्वारुद्द्रावसवोगृणन्त्त्विमाब्रह्मपीपि ॥१२७॥

१ ध्रुवयोनिः ॥ अत्र समानपदे ऋषरेभ्यः स्वरयवहकपेश्च (शु. य. प्रा. ३ अ. ६२ सू.) इत्यनेन णत्वप्राप्तौ इन्द्राग्नी विश्वभानो० (य. शु. प्रा. ३ अ. ९३ सू.) इत्यनेन णत्वनिषेधः ।

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४१५५३५०

हिसौभंगायाश्विनोर्द्ध्वर्य्यूसादयतामिहत्वा ॥ २ ॥ स्वैर्दक्षैः ॥
स्वैर्दक्षैर्दक्षपितेहसीददेवानांᳫंसुम्नेबृहतेरणाय ॥ पितेवैधि
सूनवऽआसुशेवांस्वावेशातन्वासंविशस्वाश्विनोर्द्ध्वर्य्यूसादयता
मिहत्वा ॥ ३ ॥ पृथिव्याःपुरीषम् ॥ पृथिव्याःपुरीषमस्य
प्सोनामतान्त्वाविश्वेऽअभिगृणन्तुदेवाः ॥ स्तोमंपृष्ठाघृतवं
तीहसीदप्रजावदस्मेद्रविणायजस्वाश्विनोर्द्ध्वर्य्यूसादयतामि
हत्वा ॥ ४ ॥ अदित्यास्त्वा । पृष्ठेसादयाम्यन्तरिक्षस्यधर्त्रीं ३५३

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

त्त्रिष्टुम्भनीन्दिशामधिपत्क्नीम्भुवनानाम् ॥ ऊर्म्मिर्द्रप्सोऽ
अपामसिव्विश्श्वकर्म्मातऽऋषिरश्श्विनाद्ध्वर्य्यूसादयतामिहत्त्वा
॥५॥ शुक्रश्श्च ॥ शुक्रश्श्चशुचिश्श्चग्ग्रैष्म्मावृतूऽअग्ग्नेरन्तःश्श्लेषो
सिकल्प्पेतान्द्यावापृथिवीकल्प्पन्तामापऽओषधयःकल्प्पन्ता
मग्ग्नयःपृथङ्ममज्ज्यैष्ठ्यायसव्व्रताः ॥ येऽअग्ग्नयःसमनसो
न्तराद्यावापृथिवीऽइमे ॥ ग्रैष्म्मावृतूऽअभिकल्प्पमानाऽइन्द्र
मिवदेवाऽअभिसंविशन्तुतयादेवतयाङ्गिरस्वद्ध्रुवेसीदतम् ॥६॥

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

[६-१]सजूर्ऋतुभि÷।सजूर्व्विधाभि÷सजूर्देवैःसजूर्देवैर्व्वयोनाधै
रग्नयेत्त्वाव्वैश्वानरायाश्विनाद्ध्वर्य्यूसादयतामिहत्त्वासजूर्ऋतु
भि÷सजूर्व्विधाभि÷सजूर्व्वसुभिःसजूर्देवैर्व्वयोनाधैरग्नयेत्त्वाव्वै
श्वानरायाश्विनाद्ध्वर्य्यूसादयतामिहत्त्वासजूर्ऋतुभि÷सजूर्व्वि
धाभि÷सजूरुद्रैःसजूर्देवैर्व्वयोनाधैरग्नयेत्त्वाव्वैश्वानरायाश्वि
नाद्ध्वर्य्यूसादयतामिहत्त्वासजूर्ऋतुभि÷सजूर्व्विधाभि÷सजूरा
सं. २४ दित्यैःसजूर्देवैर्व्वयोनाधैरग्नयेत्त्वाव्वैश्वानरायाश्विनाद्ध्वर्य्यूसा

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

दयतामिहत्त्वासजूरृतुभि÷सजूर्व्विधाभि÷सजूर्व्विश्वैर्द्देवैःस
जूर्द्देवैर्व्वयोनाधैरग्ग्नयेत्त्वाव्वैश्वानरायाश्श्विनाद्ध्वर्य्यूसादयतामि
हत्त्वा॥ ७॥ प्प्राणम्मे। पाह्यपानम्मेपाहिव्यानम्मेपाहिचक्क्षु
र्म्मऽउर्व्व्याव्विभाहिश्श्रोत्रम्मेश्श्लोकय॥ अपःपिन्न्वौषधीर्ज्जिन्न्व
द्विपादवचतुष्प्पात्पाहिदिवोव्वृष्टिमेरय ॥ ८ ॥ [२-२] मूर्द्धा
व्वय÷ । प्प्रजापतिश्च्छन्द÷क्षत्रंव्वयोमयन्दुञ्छन्दोव्विष्टम्भो ॥ १२९ ॥
व्वयोधिपतिश्च्छन्दोव्विश्वकर्म्माव्वय÷परमेष्ठीच्छन्दोबस्त्तो

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

वयोव्विवलञ्छन्दोव्वृष्णिर्व्वयोव्विशालञ्छन्दः पुरुषोव्वयस्त्त
न्द्रञ्छन्दोव्याघ्रोव्वयोनाधृष्टञ्छन्दः सिꣳहोव्वयश्छदिश्छ
न्दः पष्ठवाड्वयोबृहतीच्छन्दऽउक्षाव्वयः ककुप्छन्दऽऋषभो
व्वयः सतोबृहतीच्छन्दोनड्वान्वयः ॥९॥ अनड्वान्वयः। पङ्क्ति
श्छन्दोधेनुर्व्वयोजगतीच्छन्दस्त्र्यविर्व्वयस्त्रिष्टुप्छन्दोदित्त्य
वाड्वयोविराट्छन्दः पञ्चाविर्व्वयोगायत्रीच्छन्दस्त्रिवत्सोव्वयऽउ
ष्णिक्छन्दस्तुर्य्यवाड्वयोनुष्टुप्छन्दोलोकन्ताऽइन्द्रम् ॥१०॥ ३५७

१ अध्यायः १२ लोकंपृण. १ ताऽअस्य. २ । इन्द्राग्निविश्वाः. ३ ॥ इति प्रतीकानि ॥
५४ ५५ ५६

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४१५५३५०

[२-३] इन्द्राग्नीऽअव्यथमानाम् ॥ इन्द्राग्नीऽअव्यं
थमानामिष्टकान्दृꣳहतँयुवम् ॥ पृष्ठेनद्यावापृथिवीऽअन्त
रिक्षञ्चविबाधसे ॥ ११ ॥ विश्वकर्म्मात्त्वा । सादयत्त्वन्त
रिक्षस्यपृष्ठेव्यचस्वतीम्प्रथस्वतीमन्तरिक्षँयच्छान्तरिक्ष
न्दृꣳहान्तरिक्षम्माहिꣳसीः ॥ विश्वस्म्मैप्राणायापानायं
व्यानायोदानायप्रतिष्ठायैचरित्राय ॥ वायुष्ट्वाभिपातुमह्यास्व
स्त्याच्छर्दिषाशन्तमेनतयादेवतयाङ्गिरस्वद्ध्रुवासीद ॥ १२ ॥

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४१५५३५०

शतम् ॥ ७०० ॥ राज्ञ्यसि ॥ राज्ञ्यसिप्प्राचीदिग्विराडसि
दक्षिणादिक्सम्म्राडसिप्प्रतीचीदिक्स्वराडस्युदीचीदिगधिप
त्न्यसिबृहतीदिक् ॥ १३ ॥ व्विश्वकर्म्मात्त्वा । सादयत्त्व
न्तरिक्क्षस्यपृष्ठेज्ज्योतिष्म्मतीम् ॥ व्विश्वंस्म्मैप्प्राणायापानाय
व्यानायव्विश्वञ्ज्योतिर्य्यच्छ ॥ व्वायुष्टेधिपतिस्त्तयादेवतया
ङ्गिरस्वद्ध्रुवासीद ॥ १४ ॥ नभश्च । नभस्यश्चव्वार्षिकावृतूऽ ३५१

१ वायुष्टे। अत्र वायुस्ते इति पदम्। "वायुरशिरश्रेरेकाक्षरे" (शु. य. प्रा. ३ अ. ७७ सू.) इत्यनेन एकाक्षरे पदे परे वायुः अग्निः अग्नेः एतेषां विसर्गस्य षत्वं भवति। ततः ष्टुत्वे ऊष्मान्तस्थाभ्यश्च स्पर्शः (शु. य. प्रा. ४ अ. १०२ सू.) इत्यनेन द्वित्वे रूपम्।

शु. य. संहि. ॥१४१॥

अग्नेरन्तःश्लेषोसिकल्प्पैतान्द्यावापृथिवीकल्प्पन्तामापऽओ पू. अ.

षधयःकल्प्पन्तामग्नयःपृथङ्ममज्यैष्ठ्यायसव्रताः ॥ येऽ ॥ १४ ॥

अग्नयःसमनसोन्तराद्यावापृथिवीऽइमे ॥ वार्षिकावृतूऽअ

भिकल्प्पमानाऽइन्द्रमिवदेवाऽअभिसंविशन्तुतयादेवतयाङ्गि

रस्वद्ध्रुवेसीदतम् ॥ १५ ॥ इषश्च ॥ इषश्चोर्जश्चशारदा

वृतूऽअग्नेरन्तःश्लेषोसिकल्प्पैतान्द्यावापृथिवीकल्प्पन्तामा ॥१४१॥

पऽओषधयःकल्प्पन्तामग्नयःपृथङ्ममज्यैष्ठ्यायसव्रताः ॥

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४१५५३५०

येऽअग्नयꣳसमंनसोन्तराद्यावापृथिवीऽइमे ॥ शारदावृतूऽ
अभिकल्प्पमानाऽइन्द्रमिवदेवाऽअभिसंविशन्तुतयादेवतया
ङ्गिरस्वद्ध्रुवेसीदतम् ॥ १६ ॥ [६-३] आयुर्म्मे । पाहिप्प्रा
णम्मेपाह्यपानम्मेपाहिव्व्यानम्मेपाहिचक्षुर्म्मेपाहिश्श्रोत्रम्मे
पाहिव्वाचम्मेपिन्वमनोमेजिन्वात्त्मानम्मेपाहिज्ज्योतिर्म्मेय
च्छ ॥ १७ ॥ माच्छन्दः । प्प्रमाच्छन्दः प्प्रतिमाच्छन्दोऽअस्त्री
वयश्[1]च्छन्दः पङ्क्तिश्च्छन्दऽउष्णिक्छन्दो बृहतीच्छन्दोनुष्टु ३५१

1 अत्र "अस्त्रीवयश्छन्दः" इत्यत्र "चछयोः शम्" इत्यनेन यकारोत्तरवर्तिनो विसर्जनीयस्य शकारः ।

च्छन्दौविराट्छन्दौगायत्रीच्छन्दस्त्रिष्टुप्छन्दोजगतीच्छन्दः
॥ १८ ॥ पृथिवीच्छन्दः ॥ पृथिवीच्छन्दोन्तरिक्षञ्छन्दो
द्यौश्च्छन्दः समाश्च्छन्दोनक्षत्राणिच्छन्दोवाक्छन्दोमन
श्च्छन्दः कृषिश्च्छन्दोहिरण्यञ्छन्दोगौश्च्छन्दोजाच्छन्दो
श्वश्च्छन्दः ॥ १९ ॥ अग्निर्देवता ॥ अग्निर्देवतावातोदेव
तासूर्य्योदेवताचन्द्रमादेवतावसवोदेवतारुद्रादेवतादित्यादेव ॥ १४२ ॥
तामरुतोदेवताविश्वेदेवादेवताबृहस्पतिर्देवतेन्द्रोदेवतावरुणो

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४१५५३५०

देवता ॥ २० ॥ मूर्द्धासि ॥ मूर्द्धासिराड्ध्रुवासिधरुणाधर्त्र्यसि
धरणी ॥ आयुषेत्वावर्चसेत्वाकृष्यैत्वाक्षेमायत्वा ॥ २१ ॥
यन्त्रीराट् ॥ यन्त्रीराड्यन्त्र्यसियमनीध्रुवासिधरित्री ॥ इषेत्त्वो
र्जेत्त्वारय्यैत्त्वापोषायत्त्वालोकन्ताऽइन्द्रम् ॥ २२ ॥ [६-५]
आशुस्त्रिवृत् ॥ आशुस्त्रिवृद्भान्तःपञ्चदशोव्योमासप्तदशोधरु
णऽएकविꣳशःप्रतूर्त्तिरष्टादशस्तपोनवदशोभीवर्त्तःसविꣳशो

1 अध्याय १२–लोकंपृण. ५४ ३–ताऽअस्य. ५५ २ । इंद्रंविश्वाः. ३ ५६ ॥ इति प्रतीकानि ॥ २ अभीवर्तः । अत्र "अश्वरश्मिमतिसुमतिस्वसुत-चारयष्टृणिसेदिमेन्द्रियधारयचित्रभद्गुरयशुनाःस्वह्वदयघुष्यर्णाध्यव्रताभ्यर्वशक्तिपुरुशचि वकारे" (शु. य. प्रा. ३ अ. १८ सू.) इत्यनेन वकारे परे ऽभि इत्यस्य ह्रस्वेकारस्य दीर्घेकारः ।

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

वर्च्चौद्वाविꣳशश्सम्भरणस्त्रयोविꣳशोयोनिँश्चतुर्व्विꣳशोगर्ब्भाँ६
पञ्चविꣳशऽओजस्त्रिणवश्क्रतुरेकत्रिꣳशश्प्रतिष्ठात्रयस्त्रिꣳशो
ब्रध्नस्य[1]विष्टपञ्चतुस्त्रिꣳशोनाकः षट्त्रिꣳशोविवर्त्तोष्टाचत्त्वारिꣳ
शोधर्त्रञ्चतुष्टोमश् ॥ २३ ॥ [१-६] अग्नेर्भागश् ॥ अग्नेर्भा
गोसिदीक्षायाऽआधिपत्त्यम्ब्रह्मस्पृतन्त्रिवृत्स्तोमऽइन्द्रस्यभा

---

१ बध्नस्य । अत्र स्वरात्संयोगादिर्द्विरुच्यते सर्वत्र (शु. य. प्रा. ४ अ. १०० सू.) इत्यनेन द्वित्वम् । न त्वत्र भकारोत्तरवर्तिनो नकारस्य स्ववर्गीयत्वेन स्ववर्गीये चानुत्तमे (शु. य. प्रा. ४ अ. ११५ सू.) इत्यनेन निषेधः । तस्यानुत्तमे एव स्ववर्गीये वर्णपरे निषेधात् । अत्र तु अनुनासिकाश्चोत्तमाः (प. शु. प्रा. १ अ. ८९ सू.) इत्यनेन वर्गोत्तमा ङञणनमाः (वर्गोत्तमसंज्ञकाः) अनुनासिका भवन्ति । इति भकारत्तरोवर्तिनो नकारस्य वर्गोत्तमत्वात्तदतिरिक्तेषु वर्णपरेषु स्ववर्गीयेष्वेव द्वित्वनिषेधो बोध्यः । एवं तत्तत्स्थलेषु ज्ञेयम् ।

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

गोसिविष्णोराधिपत्त्यङ्क्षत्रꣳस्पृतम्पञ्चदशस्तोमोनृचक्ष
साम्भागोसिधातुराधिपत्त्यञ्जनित्रꣳस्पृतꣳसप्तदशस्तोमो
मित्रस्यभागोसिवरुणस्याधिपत्त्यन्दिवोवृष्टिर्वातस्पृतऽएक
विꣳशस्तोमोवसूंनाम्भागः ॥ २४ ॥ वसूंनाम्भागः ॥ वसूं
नाम्भागोसिरुद्राणामाधिपत्त्यञ्चतुष्पात्स्पृतञ्चतुर्विꣳशस्तो
मःऽआदित्यानाम्भागोसिमरुतामाधिपत्त्यङ्गर्भास्पृताःपञ्च ३५५
विꣳशस्तोमोदित्त्यैभागोसिपूष्णऽआधिपत्त्यमोजस्पृतन्त्रि

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

णुवस्त्तोमोदेवस्यंसवितुर्भागोसिबृहस्पतेराधिपत्त्यꣳसमी
चीर्दिशंस्पृताश्चतुष्टोमस्त्तोमोसवानाम्भागः ॥ २५ ॥ यवा
नाम्भागः ॥ यवानाम्भागोस्ययवानामाधिपत्त्यम्प्रजास्पृता
श्चतुश्चत्त्वारिꣳशस्त्तोमऽऋभूणाम्भागोसिविश्वेषान्देवानामा
धिपत्त्यम्भूतꣳस्पृतन्त्रयस्त्रिꣳशस्त्तोमःसहश्च ॥ २६ ॥ सह
श्च । सहस्यश्चहैमन्तिकावृतूऽअग्नेरन्तःश्लेषोसिकल्प्पेतान्द्या
वापृथिवीकल्प्पन्तामापऽओषधयःकल्प्पन्तामग्नयःपृथङ्मम

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४१५५३५०

मुज्यैष्ठ्यायसव्र्ताः॥ येऽअग्नयुः समनसोन्तुराद्यावांपृथिवीऽ
इमे ॥ हैमन्तिकावृतूऽअंभिकल्प्मानाऽइन्द्रमिवदुवाऽअंभि
संविंशन्तुतयादुवतयाङ्गिरुस्वद्धुवेसींदतम् ॥२७॥ [४-७] एकं
यास्तुवत । प्प्रजाऽअंधीयन्तप्प्रजापतिुरधिपतिरासीत्तिसृभिर
स्तुवतुब्रह्मासृज्यतुब्रह्मणुस्प्पतिुरधिपतिरासीत्पुञ्चभिरस्तु
वतभूतान्यसृज्यन्तभूतानाुम्पतिुरधिपतिरासीत्तसुप्तभिरस्तु

---

१ तिसृभिः। अत्र "भाविभ्यः सः षं समानपदे" (शु. य. प्रा. ३ अ. ५६ सू.) इत्यनेन पत्वप्राप्तौ "ऋकाररेफारुदयश्च" (शु. य. प्रा. ३ अ. ८३ सू.) इत्यनेन यत्र ऋकारोदयः, रेफोदयः, अरुदयश्च सकारस्तत्र प्रकृत्या स्थानेनात्र सस्य ऋकारोदयत्वान्न षत्वम् ।

सं. २५

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

वतसप्तऽऋषयोसृज्ज्यन्तधाताधिपतिरासीन्नवभिरस्तुवत
॥२८॥ नवभिरस्तुवत। पितरोसृज्ज्यन्तादितिरधिपत्न्यासीदे
कादुशभिरस्तुवतऽऋतवोसृज्ज्यन्तार्त्तवाऽअधिपतयऽआसँस्त्र
योदुशभिरस्तुवतमासाऽअसृज्ज्यन्तसंवत्त्सरोधिपतिरासीत्त्प
ञ्चदुशभिरस्तुवतक्षत्रमसृज्ज्यतेन्द्रोधिपतिरासीत्तसप्तदुशभि
रस्तुवतग्ग्राम्म्याःपशवोसृज्ज्यन्तबृहस्प्पतिरधिपतिरासीन्नव ॥ १४५ ॥
दुशभिरस्तुवत॥२९॥नवदुशभिरस्तुवत।शूद्रार्य्यावसृज्ज्येता

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

महोरात्रेऽअधिपत्नीऽआस्तामेकविꣳशत्यास्तुवतैकशफाः
पशवोऽसृज्यन्तवरुणोधिपतिरासीत्त्रयोविꣳशत्यास्तुवतक्षु
द्राःपशवोऽसृज्यन्तपूषाधिपतिरासीत्पञ्चविꣳशत्यास्तुवतार
ण्याःपशवोऽसृज्यन्तवायुरधिपतिरासीत्सप्तविꣳशत्यास्तुव
तद्यावापृथिवीव्यैतांवसवोरुद्राऽआदित्याऽअनुव्यायँस्तऽए
वाधिपतयऽआसन्नवविꣳशत्यास्तुवत॥३०॥ नवविꣳशत्या ३५१
स्तुवत ॥ नवविꣳशत्यास्तुवतवनस्पतयोऽसृज्यन्तसोमोधि

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

पतिरासीद्देकंत्रिꣳशतास्तुवतप्प्रजाऽअंसृज्ज्यन्तयवाश्चायवा
श्चाधिपतयऽआसँस्त्त्रयंस्त्रिꣳशतास्तुवतभूतान्न्यशाम्म्यन्त्प्रजा
पतिꣳपरमेष्ठ्यधिपतिरासील्लोकन्ताऽइन्द्रम् ॥ ३१ ॥ [४-८]
इतिश्रीवाजसनेयसंहितायांचतुर्दशोऽध्यायः ॥ १४ ॥

---

१ अध्यायः १२–लोकंर्तुण. १–ताऽअंस्य. २ । इंद्रविश्वाः. ३ इति प्रतीकानि ॥
॥ मंत्रः ॥ ५४ ५५ ५६

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४१५५३५०

श्रीवेदपुरुषायनमः॥अनुवाकसूत्रम्॥अग्नेजातान्पञ्च,रश्मिना
सत्यायचतस्रो,राड्यसिपञ्चा,यंपुरःपञ्चा,ग्निर्मूर्द्धैकोनत्रिꣳश,
द्येनऽऋषयोष्टौ,तपश्चनव,सप्त पञ्चषष्टिः॥ [अ. १५ मं. ६५
अनु. ७] ॥ हरिः ॐ ॥ अग्नेजातान् ॥ अग्नेजातान्प्रणुदा
नꣳसपत्नान्प्रत्यजातान्नुदजातवेदꣳ॥ अधिनोब्रूहिसुमनाऽअ
हेडँस्तवस्यामशर्म्मँस्त्रिवरूथऽउद्भौ॥१॥ सहसाजातान्॥ सह
साजातान्प्रणुदानꣳसपत्नान्प्रत्यजाताञ्जातवेदोनुदस्व॥अधि
नोब्रूहिसुमनस्यमानोवयꣳस्यामप्रणुदानꣳसपत्नान् ॥ २ ॥

[illegible]

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४१५५३५०

षोडशीस्तोमं÷ ॥ षोडशीस्तोमऽओजोद्रविणञ्चतुश्चत्त्वारिंश
शस्तोमोवर्च्चोद्रविणम् ॥ अग्नेः पुरीषमस्यप्सोनामतान्त्वा
विश्वेऽअभिगृणन्तुदेवाः ॥ स्तोमपृष्ठाघृतवतीहसीदप्प्रजावं
दस्मेद्रविणायंजस्व ॥ ३ ॥ एवश्छन्दं÷ ॥ एवश्छन्दो
वरिवश्छन्दं÷शम्भूश्छन्दं÷परिभूश्छन्दंऽआच्छच्छन्दो
मनश्छन्दोव्यचश्छन्दःसिन्धुश्छन्दं÷समुद्रश्छन्दं÷स
रिरञ्छन्दं÷ककुप्छन्दस्त्रिककुप्छन्दं÷काव्यञ्छन्दोऽअङ्कुप

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४१५५३५०

ञ्छन्दोक्षरंपङ्क्तिश्छन्दः पदपङ्क्तिश्छन्दोविष्टारपङ्क्तिश्छ
न्दः क्षुरोभ्रजश्छन्दऽआच्छच्छन्दः प्रच्छच्छन्दः ॥ ४ ॥
आच्छच्छन्दः प्रच्छच्छन्दः । सँय्यच्छन्दोवियच्छन्दोबृ
हच्छन्दोरथन्तरञ्छन्दोनिकायश्छन्दोविवधश्छन्दोगिर
श्छन्दोभ्रजश्छन्दः सँस्तुप्छन्दोनुष्टुप्छन्दऽएवश्छ
न्दोवरिवश्छन्दोवयश्छन्दोवयस्कृच्छन्दोविष्पर्द्धाश्छ
न्दोविशालञ्छन्दश्छदिश्छन्दोदूरोहणञ्छन्दस्तन्द्रञ्छ

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

शु. य. संहि. ॥१४८॥

न्दोऽअङ्काङ्कञ्छन्दः ॥ ५ ॥ [५-१] रश्मिम्मनासत्त्या पू. अ.

यं । सत्त्यञ्जिन्वप्प्रेतिंनाधर्म्मणाधर्म्मञ्जिन्वान्विंत्त्यादिवादि ॥ १५ ॥

वञ्जिन्वसन्धिनान्तरिंक्षेणान्तरिंक्षञ्जिन्वप्प्रतिधिनापृथि

व्यापृथिवीञ्जिन्वविष्टम्भेनवृष्ट्यावृष्टिञ्जिन्वप्प्रवयान्हाहर्ज्जि

न्वानुयारात्र्यारात्रीञ्जिन्वोशिजावसुंब्भ्योवसूञ्जिन्वप्प्रकेते

नादित्त्येब्भ्यंऽआदित्त्याञ्जिन्वतन्तुंनारायः ॥ ६ ॥ तन्तुं ॥१४८॥

नारायः ॥ तन्तुंनारायस्प्पोषेणरायस्प्पोषञ्जिन्वसᳬसर्प्पेणश्श्रु

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

तायश्श्रुतज्झिन्वैडेनौषधीभिरोषधीर्ज्जिन्वोत्तमेनंतनूभिस्त्तनू
र्ज्जिन्ववद्वयोधसाधीतेनाधीतज्झिन्वाभिजितातेजसातेजोंजिन्व
॥ ७ ॥ प्रतिपदंसि । प्प्रतिपदैंत्त्वानुपदंस्यनुपदैंत्त्वासम्पदं
सिसम्पदैंत्त्वातेजोंसितेजंसेत्त्वात्त्रिवृदंसि ॥ ८ ॥ त्त्रिवृदं
सि। त्त्रिवृतैंत्त्वाप्प्रवृदंसिप्प्रवृतैंत्त्वाव्विवृदंसिव्विवृतैंत्त्वासवृदंसि
सवृतैंत्त्वाक्क्रमोस्याक्क्रमायंत्त्वासङ्क्रमोसिसङ्क्रमायंत्त्वोत्क्क्रमोस्यु
त्क्क्रमायत्त्वोत्क्क्रान्तिरस्युत्क्क्रान्त्यैत्त्वाधिपतिनोर्ज्जोर्ज्जंज्झिन्व

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

॥ ९ ॥ [४÷२] राज्ञ्यंसि ॥ राज्ञ्यंसिप्प्राचीदिग्ग्वसंवस्त्ते
देवाऽअधिंपतयोग्ग्निर्हैतीनाम्प्रंतिधर्त्तात्त्रिवृत्त्वास्त्तोमं÷पृथि
व्याꣳश्रंयत्त्वाज्ज्यमुक्क्थमव्व्यंथायैस्त्तब्भ्नातुरथन्तरꣳसाम
प्प्रतिंष्ठित्त्याऽअन्तरिक्क्षऽऋषंयस्त्त्वाप्प्रथमजादेवेषुंदिवोमा
त्रयाव्वरिम्म्णाप्प्रंथन्तुव्विधर्त्ताचायमधिंपतिश्च्चतेत्त्वासर्व्वेसंवि
दानानाकंस्यपृष्ठेस्वर्ग्गेलोकेयजंमानञ्चसादयन्तु ॥ १० ॥ व्विरा ॥१४९॥
डंसि ॥ व्विराडंसिदक्क्षिणादिग्ग्रुद्द्रास्त्तेदेवाऽअधिंपतयऽइन्द्रो

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

हेतीनाम्प्रतिधुर्त्ता पञ्चदुशस्त्त्वास्त्तोम÷पृथिव्याꣳश्रयतुप्प्रऽ
उगमुक्क्थमव्व्यथायैस्त्तब्भ्नातुबृहत्त्सामुप्प्रतिष्ठित्त्याऽअन्तरि
क्क्षुऽऋषयस्त्त्वाप्प्रथमुजादेवेषुदिवोमात्त्रयावरिम्म्णाप्प्रथन्तु
विधुर्त्ताचायमधिपतिश्चतेत्त्वासर्व्वेसंविदानानाकेस्यपृष्ठेस्वर्ग्गे
लोकेयजमानञ्चसादयन्तु ॥ ११ ॥ सम्म्राडसि । प्प्रतीची
दिगादित्त्यास्त्तेदेवाऽअधिपतयोव्वरुणोहेतीनाम्प्रतिधुर्त्तासप्त
दुशस्त्त्वास्त्तोम÷पृथिव्याꣳश्रयतुमरुत्त्वतीयमुक्क्थमव्व्य

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

शु. य. संहि. थायैस्त्तꣳस्नातुव्वैरूपꣳसामप्प्रतिष्ठित्त्याऽअन्तरिक्क्षऽऋषय पृ. अ.
स्त्त्वाप्प्रथमजादेवेषुदिवोमात्त्रयाव्वरिम्म्णाप्प्रथन्तुविधर्त्ताचा ॥ १५ ॥
॥१५०॥ यमधिपतिश्चतेत्त्वासर्व्वेसंविदानानाकस्यपृष्ठेस्वर्ग्गेलोकेयजमा
नञ्चसादयन्तु॥१२॥ स्वराडसि॥ स्वराडस्युदीचीदिङ्मरुतस्त्ते
देवाऽअधिपतयꣳसोमोहेतीनाम्प्प्रतिधर्त्तैकविꣳशस्त्त्वास्त्तो
मः पृथिव्व्याꣳश्श्रयतुनिष्केवल्यमुक्थमव्व्यथायैस्त्तꣳस्नातुव्वैरा ॥१५०॥
जꣳसामप्प्रतिष्ठित्त्याऽअन्तरिक्क्षऽऋषयस्त्त्वाप्प्रथमजादेवे

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४१५५३५०

षुंदिवोमात्रयाव्वरिम्म्णाप्प्रथन्तुव्विधर्त्ताचायमधिपतिश्श्चतेत्त्वा
सर्व्वेसंविदानानाकस्यपृष्ठेस्वर्ग्गेलोकेयजमानञ्चसादयन्तु ।१३।
अधिपत्न्यसि। बृहतीदिग्विश्वेतेदेवाऽअधिपतयोबृहस्प्पतिर्हे
तीनाम्प्रतिधर्त्तात्रिणवत्रयस्त्रिꣳशौत्त्वास्त्तोमौपृथिव्याꣳश्रय
तांव्वैश्वदेवाग्निमारुतेऽउक्थेऽअव्यथायैस्त्तभ्नीताꣳशाक्वररै
वतेसामनीप्प्रतिष्ठित्त्याऽअन्तरिक्षऽऋषयस्त्वाप्प्रथमजादेवे ३७१
सं. २६ षुंदिवोमात्रयाव्वरिम्म्णाप्प्रथन्तुव्विधर्त्ताचायमधिपतिश्श्चतेत्त्वा

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

सर्व्वैसंविदानानाकस्यपृष्ठेस्वर्ग्गेलोकेयजमानञ्चसादयन्तु ।१४। ॥ १५ ॥
॥१५१॥ [५-३] अयम्पुरः ॥ अयम्पुरोहरिकेशःसूर्य्यरश्मिस्तस्य
रथगृत्सश्चरथौजाश्चसेनानीग्ग्रामण्ण्यौ ॥ पुञ्जिकस्थलाचक्र
तुस्थलाचाप्सरसौदङ्क्ष्णवःपशवोहेतिःपौरुषेयोवधःप्रहेति
स्तेभ्योनमोऽअस्तुतेनोवन्तुतेनोमृडयन्तुतेयन्द्विष्मोयश्च
नोद्वेष्टितमेषाञ्जम्भेदद्ध्मः॥१५॥अयन्दक्षिणा।विश्वकर्म्मा ॥ १५१ ॥
तस्यरथस्वनश्चरथेचित्रश्चसेनानीग्ग्रामण्ण्यौ ॥ मेनकाचसहज

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४१५५३५०

न्याचाप्प्सुरसौयातुधानाहेतीरक्षाᳬसिप्प्रहेतिस्तेब्भ्योन
मोऽअस्तुतेनोवन्तुतेनोमृडयन्तुतेयन्द्विष्म्मोयश्चनोद्वेष्टितमे
षाञ्जम्भेदद्ध्मः ॥ १६ ॥ अयम्पश्चात् ॥ अयम्पश्चाद्विश्वव्व्य
चास्त्तस्यरथप्प्रोतश्चासमरथश्चसेनानीग्ग्रामण्ण्यौ ॥ प्रम्म्लो
चन्तीचानुम्म्लोचन्तीचाप्प्सुरसौब्व्याग्घ्राहेतिःसर्प्पाःप्प्रहेति
स्तेब्भ्योनमोऽअस्तुतेनोवन्तुतेनोमृडयन्तुतेयन्द्विष्म्मोयश्च
नोद्वेष्टितमेषाञ्जम्भेदद्ध्मः ॥ १७ ॥ अयमुत्तरात् ॥ अयमु

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

त्तरात्त्सँय्यद्धसुस्तस्यताक्क्ष्र्यँश्चारिष्टनेमिश्चसेनानीग्ग्राम
ण्ण्यौ ॥ व्विश्वाचीचघृताचीचाप्प्सरसावापोहेतिर्व्वातःप्प्रहेति
स्त्तेब्भ्योनमोऽअस्त्तुतेनोवन्तुतेनोम्मृडयन्तुतेयन्द्विष्म्मोयश्च
नोद्वेष्टितमेषाञ्जम्भेदद्ध्मः ॥१८॥ अयमुपरि ॥ अयमुपर्य्यर्व्वा
ग्वसुस्तस्यसेनजिच्चसुषेणश्चसेनानीग्ग्रामण्ण्यौ ॥ उर्व्वशीचपू
र्व्वचित्तिश्चाप्प्सरसावव्वस्फूर्ज्जँहेतिर्व्विद्युत्त्प्रहेतिस्त्तेब्भ्योनमोऽ
अस्त्तुतेनोवन्तुतेनोम्मृडयन्तुतेयन्द्विष्म्मोयश्चनोद्वेष्टितमेषा

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

ज्ञम्भैदद्ध्मः ॥ १९ ॥ [५-४] अग्निर्म्मूर्द्धा । दिवश्ककु
त्पतिं÷पृथिव्याऽअयम् ॥ अपाꣳरेताꣳसिजिन्वति ॥ २० ॥
अयमग्निः । संहस्त्रिणोव्वाजस्यशतिनस्प्पतिं÷ ॥ मूर्द्धाकवी
र्य्यीणाम् ॥ २१ ॥ त्वामग्ने ॥ त्वामग्नेपुष्कराद्ध्यथर्व्वानिर
मन्थत ॥ मूर्द्ध्नोव्विश्वस्यव्वाघतं÷ ॥ २२ ॥ भुवोयज्ञस्य ॥ भुवोय
ज्ञस्यरजसश्चनेतायत्रानियुद्भिःसचसेशिवाभिं÷ ॥ दिविमूर्द्धा २८३
नंन्दधिषेस्वर्षाञ्जिह्वामग्नेचकृषेहव्यवाहम् ॥ २३ ॥ अबोध्य

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

ग्निः । सुमिधाजनानाम्प्रतिधेनुमिवायतीमुषासम् ॥ युह्वाऽ
इवप्प्रवयामुज्जिहानाःप्प्रभानवःसिस्रतेनाकुमच्छं ॥ २४ ॥
अवोचामकवये ॥ अवोचामकवयेमेध्यायवचोवन्दारुवृषभा
यवृष्णे ॥ गविष्ठिरोनमसास्तोममग्नौदिवीवरुक्ममुरुव्यञ्च
मश्रेत् ॥ २५ ॥ अयमिह । प्प्रथमोधायिधातृभिर्होतायजि
ष्ठोऽअध्वरेष्वीड्यः ॥ यमप्नवानोभृगवोविरुरुचुर्वनेषुचित्रं

१ धेनुमिवायतीमुषासम् । अत्र ईमृशब्दात्परस्य उपशब्दस्य कारस्य "उपमहोभिर्नेकेमी०" (शु. य. प्रा. ३ अ. ११८ सू.) इत्यनेन दीर्घः ।

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

द्विऽभ्वंद्विशोविंशे ॥ २६ ॥ जनस्यगोपाः ॥ जनस्यगोपाऽअ
जनिष्टजागृविरग्निःसुदक्षः सुवितायनव्यसे ॥ घृतप्रतीको
बृहतादिविस्पृशाद्युमद्विभातिभरतेभ्यःशुचिः ॥ २७ ॥
त्वामग्ने ॥ त्वामग्नेऽअङ्गिरसोगुहाहितमन्वविन्दञ्छिश्रि
याणंवनेवने ॥ सञ्जायसेमथ्यमानःसहोमहत्त्वामाहुःसहस

१ दिविस्पृशाः । अत्र "भाविभ्यः सः षः समानपदे" इत्यनेन प्राप्तस्य षत्वस्य अनुसंतनोतुत्वद्दस्पतिसुतस्यसुसमिद्धायसुसन्दशमभिसख्याऽभिसंवि-शन्तुसुसख्याऽअतिस्थूलम्मुसलेपकीसंयाजात्रकतुस्थलाजिसकथो दिविस्पृशा०" (शु. य. प्रा. ३ अ. ८२ सू.) इत्यनेन प्रकृतिभावे षत्वनिषेधः । २ सः जायसे । अत्र "व्यञ्जने च" (शु. य. प्रा. ३ अ. १६ सू.) इत्यनेन जायसे परे स इत्यस्य विसर्जनीयस्य लोपे सञ्जायसे इति पदम् ।

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

स्पुत्रमङ्गिरः ॥ २८ ॥ सखायःसम् ॥ सखायःसंवःसम्य
ञ्चमिषꣳस्तोमंञ्चाग्नये ॥ वर्षिष्ठायक्षितीनामूर्जोनप्त्रेसहस्व
ते ॥ २९ ॥ सꣳसमित् ॥ सꣳसमिद्युवसेवृषन्नग्नेविश्वान्यर्य्य
ऽआ ॥ इडस्पदेसमिध्यसेसनोवसून्याभर ॥ ३० ॥ त्वामग्ने
ऽश्ववस्तम ॥ त्वामग्नेऽश्ववस्तमहवन्तोविक्षुजन्तवः ॥
शोचिष्केशम्पुरुप्रियाग्नेहव्यायवोढवे ॥ ३१ ॥ एनावः ॥

1 इडः पदे इति पदम् । अत्र "आविनिरिडइडाया वर्गान्तिमेरिवः" (शु. य. प्रा. ३ अ. २३ सू.) इत्यनेन विसर्जनीयस्य ककारपकारपरयोः सकारः षकारश्च यथायोगं विधीयते । इडस्पदे इति रूपम् ।

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४१५५३५०

एनावोऽअग्निन्नमसोर्जौनपातमाहुवे ॥ प्रियञ्चेतिष्ठमरतिꣳ
स्वध्वरंविश्वस्यदूतममृतम् ॥ ३२ ॥ विश्वस्यदूतम् ॥ विश्वस्य
दूतममृतंविश्वस्यदूतममृतम् ॥ सयोजतेऽअरुषाविश्वभोजसा
सदुद्रवत्स्वाहुतः ॥ ३३ ॥ सदुद्रवत् ॥ सदुद्रवत्स्वाहुतꣳसदुद्र
वत्स्वाहुतः ॥ सुब्रह्मायज्ञःसुशमीवसूनान्देवꣳराधोजनाना
म ॥ ३४ ॥ अग्नेवाजस्य ॥ अग्नेवाजस्यगोमतऽईशानꣳसहसो
यहो ॥ अस्मेधेहिजातवेदोमहिश्रवः ॥ ३५ ॥ सऽइधानः ॥

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

सऽइद्धानोवसुष्कविरग्निरीडेन्योगिरा ॥ रेवदुस्म्मभ्यम्पुर्व्वणी
कदीदिहि ॥ ३६ ॥ क्षपोराजन् ॥ क्षपोराजन्नुतत्क्मनाग्नेवस्त्तौ
स्तोषसः ॥ सतिग्ग्मजम्भरक्षसोदहप्प्रति ॥ ३७ ॥ भद्रोनः ॥
भद्रोनोऽअग्निराहुतोभद्रारातिः सुभगभद्रोऽअध्वरः ॥ भद्राऽ
उतप्प्रशस्त्तयः ॥ ३८ ॥ भद्राऽउत । प्प्रशस्त्तयोभद्रम्मनः
कृणुष्ष्ववृत्रतूर्य्ये ॥ येनासमत्त्सुसासहः ॥ ३९ ॥ येनासम

---

१ वसुष्कविः इति । "कविष्करत्कृधिषु" (शु. य. प्रा. ३ अ. ३२ सू.) इत्यनेन कविः करत् कृधिः एतेषु परेषु विसर्जनीयस्य सकारः षकारश्च भवति । तेनात्र कविः परे पूर्वविसर्जनीयस्य षकारे कृते "ऊष्मान्तस्थाभ्यश्च स्पर्शः" (शु. य. प्रा. ४ अ. १०२ सू.) इत्यनेन ककारस्य द्वित्वम् ।

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

त्त्सु । सासहोर्वस्त्थिरातंनुहिभूरिशर्द्धंताम् ॥ व्वनेमातेऽअभि
ष्टिंभिः ॥ ४० ॥ अग्निन्तम् ॥ अग्निन्तम्मन्न्येयोव्वसुरस्त्तँ
य्यँय्यन्न्तिधेनवं÷ ॥ अस्त्तमर्व्वन्न्तऽआशवोस्त्तन्नित्त्यासोव्वा
जिनऽइषंस्तोतृब्भ्यऽआभर ॥ ४१ ॥ सोऽअग्निः ॥ सोऽ
अग्निर्य्योव्वसुर्गृणेसँय्यमायन्न्तिधेनवं÷ ॥ समर्व्वन्तोरघु
द्रुवःसँसुजातासं÷सूरयऽइषंस्तोतृब्भ्यऽआभर ॥ ४२ ॥
उभेसुश्चन्द्र । सर्प्पिषोदर्व्वीश्रीणीषऽआसनि ॥ उतोनऽउत्त्पु

१ सोऽअग्निः । अत्र "व्यञ्जने" ५ (शु. य. प्रा. ३ अ. १० सू.) इति सूत्रे व्यञ्जने परे एव विसर्गस्य लोपविधानात् लोपस्तो विसर्गस्य सत्त्वे

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४१५५३५०

॥१५६॥ पूर्व्याऽउक्थेषुशवसस्पतऽइषँ स्तोतृभ्यऽआभर ॥ ४३ ॥
अग्नेतम ॥ अग्नेतमद्याश्वन्नस्तोमैः क्रतुन्नभद्रँ हृदिस्पृ
शम् ॥ ऋध्यामातऽओहैः ॥ ४४ ॥ अधाहि ॥ अधा
ह्यग्नेक्रतोर्भद्रस्यदक्षस्यसाधोः ॥ रथीऽऋतस्यबृहतो
बभूथ ॥ ४५ ॥ एभिर्नः ॥ एभिर्नोऽअर्कैर्भवानोऽअर्वा
ङ्स्वर्णज्योतिः ॥ अग्नेविश्वेभिः सुमनाऽअनीकैः ॥ ४६ ॥ ॥१५६॥

ओरवे स्तोऽअग्निः इति पदम् । २ सुश्चन्द्रः । अत्र "चन्द्रेसु शकारेण" (शु. य. प्रा. ३ अ. ५४ सू.) इत्यनेन चन्द्रशब्दे परे सुशब्दः शकारेण व्यवधीयते । तत्र "ऊष्मान्तस्थाऽन्यश्च" स्पर्शः (शु. य. प्रा. ४ अ. १०२ सू.) इत्यनेन चकारस्य द्वित्वम् ।

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४१५५३५०

अ॒ग्निꣳहोता॑रम् ॥ अ॒ग्निꣳहोता॑रम्मन्ये॒दास्व॑न्तं॒व्वसु॑ꣳसू॒नुꣳ
सह॑सोजा॒तवे॑द॒संव्विप्र॒न्नजा॒तवे॑दसम् ॥ यऽऊ॒र्द्ध्वया॑स्वद्ध्व॒रोदे॒वो
दे॒वाच्च्या॑कृ॒पा ॥ घृ॒तस्य॒व्विभ्रा॑ष्टि॒मनु॑वष्टि॒शो॒चि॒षा॒जुह्वा॑नस्य
स॒र्प्पिष॑÷ ॥ ४७ ॥ अग्ने॒त्त्वम् ॥ अग्ने॒त्त्वन्नो॒ऽअन्त॑मऽउ॒त
त्रा॒ता॒शि॒वोभ॑वावरू॒त्थ्य॒÷ ॥ व्वसु॑र॒ग्निर्व्वसु॑श्श्रवा॒ऽअच्छा॑नक्षि
द्यु॒मत्त॑मꣳर॒यिन्दा॑ꣳ ॥ तन्त्वा॑शोचिष्ठदीदि॒वꣳसु॒म्न्नाय॑नू॒नमी॑
मह॒ेसखि॑भ्भ्यꣳ ॥४८॥ [२९-५] येन॒ऽऋष॑यꣳ ॥ येन॒ऽऋष॑य

सं. २७ २३१

स्तपसासत्त्रमायन्निन्धानाऽअग्निꣳस्वराभरन्तः ॥ तस्मिन्न
हन्निदधेनाकेऽअग्निँय्यमाहुर्म्मनवस्त्तीर्ण्णबर्हिषम् ॥ ४९ ॥
तम्पत्नीभिः ॥ तम्पत्नीभिरनुगच्छेमदेवाः पुत्रैर्भ्भ्रातृभिरुत
वाहिरण्ण्यैः ॥ नाकङ्गृब्भ्णानाः सुकृतस्यलोकेतृतीयेपृष्ठेऽअधि
रोचनेदिवः ॥ ५० ॥ आवाचः ॥ आवाचोमद्ध्यमरुहद्भ्भुर
ण्युरयमग्निः सत्पतिश्चेकितानः ॥ पृष्ठेपृथिव्व्यानिहितोदवि
द्युतदधस्पदङ्कृणुताँय्येपृतन्न्यवः ॥ ५१ ॥ अयमग्निः ॥

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

अयमग्निर्व्वीरतमोव्वयोधाःसहस्स्रियोद्योततामप्प्रयुच्छन्॥ व्वि
भ्राजमानःसरिरस्यमद्ध्यऽउपप्प्रयाहिदिव्व्यानिधामं ॥५२॥
सम्प्रच्यवद्ध्वमुप। सप्प्रयाताग्नेपथोदेवयानाङ्कृणुद्ध्वम्॥ पुनः
कृण्ण्वानापितरायुवानान्वाताᳬंसीत्त्वयितन्तुमेतम् ॥५३॥
उद्बुद्ध्यस्व ॥ उद्बुद्ध्यस्वाग्नेप्रतिजागृहित्त्वमिष्टापूर्त्तेसᳬंसृजेथा
मयञ्च ॥ अस्म्मिन्त्सधस्त्थेऽअद्ध्युत्तरस्म्मिन्व्विश्वेदेवायजमा
नश्चसीदत ॥ ५४ ॥ येनव्वहसि । सहस्स्रँय्येनाग्नेसर्व्ववेद

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

सम् ॥ तेनेमँय्यज्ञन्नोनयस्वर्द्देवेषुगन्तवे ॥ ५५ ॥ अयन्ते ॥
॥१५८॥ अयन्तेयोनिंऽऋत्त्वियोयतोजातोऽअरोचथाः ॥ तञ्जानन्न
ग्नऽआरोहाथानोवर्द्धयारयिम् ॥ ५६ ॥ [८-६] तपश्च ॥
तपश्चतपस्यश्चशैशिरावृतूऽअग्नेरन्तःश्लेषोसिकल्पेतान्द्या
वापृथिवीकल्पन्तामापऽओषधयःकल्पन्तामग्नयःपृथङ्मम
मज्यैष्ठ्यायसव्रताः॥येऽअग्नयःसमनसोन्तराद्यावापृथिवीऽ ॥ १५८ ॥
इमे ॥ शैशिरावृतूऽअभिकल्पमानाऽइन्द्रमिवदेवाऽअभिसं

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

विशन्तुतयांदेवतंयाङ्गिरस्वद्ध्रुवेसीदतम् ॥ ५७ ॥ परमेष्ठी
त्त्वां । सादयतुदिवस्पृष्ठेज्ज्योतिष्म्मतीम् ॥ व्विश्वस्म्मैप्प्राणा
यांपानायंव्यानायांव्विश्वञ्ज्योतिर्य्यच्छ ॥ सूर्य्यस्त्तेधिपतिस्त्त
यांदेवतंयाङ्गिरस्वद्ध्रुवासीद ॥ ५८ ॥ लोकम्पृण । च्छिद्रम्पृ
णाथोसीदद्ध्रुवात्त्वम् ॥ इन्द्राग्नीत्त्वाबृहस्प्पतिरस्मिन्म्योना
वसीषदन् ॥ ५९ ॥ ताऽअस्य ॥ ताऽअस्यसूददोहसःसोमंᳮ

१ दिवस्पृष्ठे । इत्यत्र "दिवोऽक्कुत्सुधिस्यो:" (शु. य. प्रा. ३ अ. ६४ सू.) इत्यनेन दिवः सम्बन्धिनः विसर्गस्य षकारत्वम् ।

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

श्रीणन्तिपृश्नयः ॥ जन्मन्देवानांविशस्त्रिष्वारोचनेदिवः
॥ ६० ॥ इन्द्रंविश्वाः ॥ इन्द्रंविश्वाऽअवीवृधन्त्समुद्रव्यच
सङ्गिरः ॥ रथीतमꣳरथीनांवाजानाꣳसत्पतिम्पतिम् ॥ ६१ ॥
प्रोथदश्वः ॥ प्रोथदश्वोनयवसेविष्यन्यदामहःसंवरणाद्व्य
स्थात् ॥ आदस्यवातोऽअनुवातिशोचिरधस्मतेव्रजनङ्कृष्ण
मस्ति ॥ ६२ ॥ आयोष्ट्वा ॥ आयोष्ट्वासदनेसादयाम्म्यवत
श्छायायाꣳसमुद्रस्यहृदये ॥ रश्मीवतीम्भास्वतीमायाद्या

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

म्भास्यापृथिवीमोर्व्वन्तरिक्षम् ॥ ६३॥ परमेष्ठीत्त्वा । सादय
तुदिवस्पृष्ठेब्यचस्वतीम्प्रथस्वतीन्दिवँय्यच्छदिवन्दृꣳहदिव
म्माहिꣳसीः ॥ व्विश्वस्म्मैप्प्राणायापानायव्व्यानायोदानाय
प्प्रतिष्ठायैचरित्राय ॥ सूर्य्यस्त्वाभिपातुमह्यास्वस्त्याच्छर्दि
षाशन्तमेनतयादेवतयाङ्गिरस्वद्ध्रुवासीदतम् ॥ ६४ ॥ सहस्र
स्यप्प्रमासि । सहस्रस्यप्प्रतिमासिसहस्रस्योन्मासिसाहस्रोसि
सहस्रायत्त्वा ॥ ६५ ॥ [९-७] इतिश्रीवाजसनेयसंहितायां
पञ्चदशोऽध्यायः ॥ १५ ॥

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४१५५३५०

श्रीवेदपुरुषायनमः ॥ अनुवाक-
सूक्तम् ॥ नमस्तेषोडश, हिरण्यबाहव, ऽउष्णीषिणे, तक्षभ्यो,
ज्येष्ठायपञ्चकाः, स्रुत्यायचतस्रः, शंभवायैका, पार्यायपञ्च,
द्रापेऽअंधसोविंᳯशति, नवषट्षष्टिः [अ. १६ मं. ६६ अनु.
९]॥ हरिः ॐ ॥ नमस्ते[1] ॥ नमस्तेरुद्रमन्यवऽउतोतऽइषवेन
मः ॥ बाहुभ्यामुततेनमः ॥ १ ॥ यातें । रुद्रशिवातनूरघो

१ नमस्ते । इत्यत्र "तथयोः सम्" (शु. य. प्रा. ३ अ. ८ सू.) इत्यनेन सकारोत्तरवर्तिनो विसर्जनीयस्य तकारे परे सकारे कृते नमस्ते इति सिध्यति ।

pdf by कृष्णाशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

रापापकाशिनी ॥ तयानस्तन्वाशन्तमयागिरिशन्ताभिचाक
शीहि ॥२॥ यामिषुम् ॥ यामिषुङ्गिरिशन्तहस्तेबिभर्ष्यस्तवे ॥
शिवाङ्गिरित्रताङ्कुरुमाहिꣳसीःपुरुषञ्जगत् ॥ ३ ॥ शिवेनव
चसा । त्वागिरिशाच्छावदामसि ॥ यथानःसर्व्वमिज्जगदय
क्ष्मꣳसुमनाऽअसत् ॥ ४ ॥ अद्ध्यवोचत् ॥ अद्ध्यवोचदधिव
क्ताप्प्रथमोदैव्योभिषक् ॥ अहीँश्चसर्व्वाञ्जम्भयन्त्सर्व्वाश्चयातु ३११

१ अहीन् च । इत्यत्र "चच्छयोः शम्" (शु. य. प्रा. ३ अ. १३५ सू.) इत्यनेन नकारस्य चछयोः परयोः शकारं विधीयते उपधायामनुनासिकमपि । तथा अहीँश्च इति कृते "ऊष्मान्तस्थाभ्यश्च स्पर्शः" (शु. य. प्रा. ४ अ. १०२ सू.) इत्यनेन चकारस्य द्वित्वम् ।

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

धान्न्योधुराचीᳪपरासुव ॥ ५ ॥ असौयः ॥ असौयस्त्ताम्म्रोऽ
॥१६१॥ अरुणऽउतबब्भ्रुश्सुमङ्गलः ॥ येचैनᳪरुद्राऽअभितोदिक्क्षु ॥ १६
श्श्रिताश्सहस्स्रशोवैषाᳪहेडऽईमहे ॥ ६ ॥ असौयः ॥ असौयो
वसर्प्पतिनीलग्ग्रीवोविलोहितः ॥ उतैनङ्गोपाऽअदृश्रन्नदृश्र
न्नुदहार्य्यःसदृष्टोमृडयातिनः ॥ ७ ॥ नमोस्तु ॥ नमोस्तु
नीलग्ग्रीवायसहस्राक्क्षायमीढुषे॥अथोयेऽअस्यसत्त्वानोहन्ते ॥१६१।

१ विक्षुश्श्रिताः । अत्र विक्षु इति पदम् । "करेफाभ्यां च" (शु. य. प्रा. ३ अ. ५८ सू.) इत्यनेन करेफाभ्यां परस्य षकारस्य षत्वं विधीयते । तेनात्र सकारस्य षत्वे कषसंयोगे क्षः इति क्षत्वे रूपम् । "स्वरात्संयोगादिर्द्विरुच्यते सर्वत्र" (शु. य. प्रा. ४ अ. १०० सू.) इत्यनेन शकारस्य द्वित्वम् ।

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

ज्योंकरन्नमः ॥ ८ ॥ प्रमुंच ॥ प्रमुंचधन्वनस्त्वमुभयो
रार्त्न्योर्ज्याम् ॥ याश्चंतेहस्तऽइषवःपराताभगवोवप ॥ ९ ॥
विज्यन्धनुःकपर्दिनोविशल्योबाणवाँ२॥ऽउत ॥ अनेश
न्नस्ययाऽइषवऽआभुरस्यनिषङ्गधिः ॥ १० ॥ याते । हेति
र्मीढुष्टमहस्तेबभूवतेधनुः ॥ तयास्मान्विश्वतस्त्वमय
क्ष्मयापरिभुज ॥ ११ ॥ परिते ॥ परितेधन्वनोहेतिरस्मा
न्वृणक्तुविश्वतः ॥ अथोयऽइषुधिस्तवारेऽअस्मन्निधेहि

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

तम् ॥ १२ ॥ अवतत्त्यधनुं÷ ॥ अवतत्त्यधनुष्ट्व६ँसहंस्त्राक्क्षुश
तैषुधे ॥ निशीर्य्यंशल्ल्यानाम्मुखाशिवोनं÷सुमनाभव ॥ १३ ॥
नमंस्त्ते ॥ नमंस्त्तऽआयुंधायानाततायधृष्ण्णवें ॥ उभा
ब्भ्यांमुततेनमौबाहुब्भ्यान्तवधन्न्वंने ॥ १४ ॥ मानं÷ ॥
मानौंमहान्तंमुतमानोंऽअब्भंकम्मानुऽउक्क्षंन्तमुतमानंऽउ
क्क्षितम् ॥ मानौंव्वधीःपितरम्मोतमातरम्मानं÷प्प्रियास्त्तन्न्वो
रुद्द्ररीरिषः ॥ १५ ॥ मानंस्त्तोके । तनंयेमानुऽआयुंषिमानो

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

गोषुमानोऽअश्वेषुरीरिषः ॥ मानोवीरान्रुद्र भामिनोवधीर्हवि ष्मन्तःसदमित्त्वाहवामहे ॥ १६ ॥ [१६-१] शतम् ॥ ८०० ॥ नमोहिरण्यबाहवे ॥ सेनान्येदिशाञ्चपतयेनमो नमोवृक्षेभ्योहरिकेशेभ्यःपशूनाम्पतयेनमोनमः शष्पिञ्ज राय त्त्विषीमतेपथीनाम्पतयेनमोनमोहरिकेशायोपवीतिनेपु ष्टानाम्पतयेनमोनमोबभ्लुशाय ॥ १७ ॥ नमोबभ्लु शाय । व्याधिनेन्नानाम्पतयेनमोनमोभवस्यहेत्यैजगताम्पत

१ त्विषिमते । अत्र ऋधुतरित्विषिभ्रजिभवतपिबेत्सातिहरक्षा मकारे (शु. य. प्रा. ३ अ. ११७ सू.) इत्यनेन मकारे परे एत दीर्घा भवन्ति ।

सं. २८

येनमोनमोरुद्रायातताविनेक्षेत्राणाम्पतयेनमोनमः सूताया
हन्त्यैवनानाम्पतयेनमोनमोरोहिताय ॥ १८ ॥ नमोरोहि
ताय । स्थपतयेवृक्षाणाम्पतयेनमोनमोभुवन्तयेवारिवस्कृ
तायौषधीनाम्पतयेनमोनमोमन्त्रिणेवाणिजायकक्षाणाम्पत
येनमोनमऽउच्चैर्घोषायाक्रन्दयतेपत्तीनाम्पतयेनमोनमः
कृत्स्नायतया ॥ १९ ॥ नमः कृत्स्नायतया । धावतेसत्त्व
नाम्पतयेनमोनमः सहमानायनिव्याधिनऽआव्याधिनीनाम्प

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४१५५३५०

तंयेनमोनमोनिषङ्गिणेंककुभायस्तेनानाम्पतंयेनमोनमोनि
चेरवेपरिचरायारंण्यानाम्पतंयेनमोनमोवञ्चते ॥ २० ॥ नमो
वञ्चते । परिवञ्चतंस्तायूनाम्पतंयेनमोनमोनिषङ्गिणऽइषुधि
मतेतस्कराणाम्पतंयेनमोनमं÷सृकायिभ्योजिघांᳪसद्भ्यो
मुष्णतांम्पतंयेनमोनमोसिमद्भ्योनक्तञ्चरद्भ्योविकृन्ता
नाम्पतंयेनमं÷ ॥ २१ ॥ [५-२] नमंऽउष्णीषि
णें । गिरिचरायंकुलुञ्चानाम्पतंयेनमोनमंऽइषुमद्भ्योधन्वा ४०५

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४१५५३५०

यिभ्यश्च वो नमो नमऽआतन्वानेभ्यः प्रतिदधानेभ्यश्च वो
नमो नमऽआयच्छद्भ्योऽस्यद्भ्यश्च वो नमो नमो विसृजद्
भ्यः ॥ २२ ॥ नमो विसृजद्भ्यो । विध्यद्भ्यश्च वो
नमो नमः स्वपद्भ्यो जाग्रद्भ्यश्च वो नमो नमः शयानेभ्य
ऽआसीनेभ्यश्च वो नमो नमस्तिष्ठद्भ्यो धावद्भ्यश्च वो नमो
नमः सभाभ्यः ॥ २३ ॥ नमः सभाभ्यः । सभापति
भ्यश्च वो नमो नमोऽश्वेभ्योऽश्वपतिभ्यश्च वो नमो नमऽआव्या

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

धिनीभ्योवितिविद्धान्तीभ्यश्चवोनमोनमऽउगणाभ्यस्तृꣳह
तीभ्यश्चवोनमोनमोगणेभ्यः ॥ २४ ॥ नमोगणेभ्यो।
गणपतिभ्यश्चवोनमोनमोव्रातेभ्योव्रातपतिभ्यश्चवोनमोन
मोगृत्सेभ्योगृत्सपतिभ्यश्चवोनमोनमोविरूपेभ्योविश्वरू
पेभ्यश्चवोनमोनमःसेनाभ्यः ॥ २५ ॥ नमःसेनाभ्यः।
सेनानिभ्यश्चवोनमोनमोरथिभ्योऽअरथेभ्यश्चवोनमोन
मःक्षत्तृभ्यःसंग्रहीतृभ्यश्चवोनमोनमोमहद्भ्योऽअर्भके

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

ऽभ्यंश्चवोनमं÷ ॥ २६ ॥ [५-३] नमस्त्तक्षंऽभ्योे ।
रथकारेऽभ्यंश्चवोनमोनमःकुलालेऽभ्यःकर्म्मारेऽभ्यश्चवोनमो
नमोंनिषादेऽभ्यं÷पुञ्जिष्ठेऽभ्यश्चवोनमोनमं÷श्वनिऽभ्योंमृगयु
ऽभ्यंश्चवोनमोनमःश्वऽभ्यं÷ ॥ २७ ॥ नमःश्वऽभ्यः÷ ।
श्वपंतिऽभ्यश्चवोनमोनमोंभवायंचरुद्रायंचनमं÷शर्व्वायंचपशु
पतंयेचनमोनीलंग्ग्रीवायचशितिकण्ठांयचनमं÷कपर्द्दिने
॥ २८ ॥ नमं÷कपर्द्दिने । चव्युप्तकेशायचनमं÷सहस्रा

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

क्षायंचशतधन्वनेचनमोगिरिशयायंचशिपिविष्टायंचनमो
मीढुष्टमायचेषुमतेचनमोह्रस्वायं ॥ २९ ॥ नमोह्रस्वायं ।
चवामनायंचनमोबृहतेचवर्षीयसेचनमोवृद्धायंचसवृधेचन
मोऽग्र्यायचप्रथमायंचनमऽआशवे ॥ ३० ॥ नमऽआ
शवे । चाजिरायंचनमःशीघ्र्यायचशीभ्यायचनमऽऊ
र्म्यायचावस्वन्यायचनमोनादेयायंचद्वीप्यायच ॥ ३१ ॥ ४०१
[५-४] नमोज्येष्ठायं । चकनिष्ठायंचनमःपूर्वजायंचापर

जायंचुनमौमद्ध्यमायंचापगल्भायंचनमोजघन्न्यायचबु
द्ध्न्यायचुनमःसोभ्यायं ॥ ३२ ॥ नमःसोभ्याय । चप्प्रति
सर्य्यायचुनमोयाम्म्यायंचक्षेम्म्यायचुनमःश्श्लोक्यायंचा
वसान्न्यायचुनमंऽउर्व्वर्य्यायचखल्यायंचनमोवन्न्यायं ॥ ३३ ॥
नमोवन्न्याय । चकक्ष्यायचुनमःश्श्रवायंचप्प्रतिश्श्रवायंचन
मंऽआशुषेणायचाशुरंथायचनमःशूरायचावभेदिनेचनमोबि
ल्मिनें ॥ ३४ ॥ नमोबिल्मिनें । चकवचिनेंचनमोवर्म्मि

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

णेचव्वरूथिनेचुनमं÷श्श्रुतायचश्श्रुतसेनायचुनमोदुन्दुब्भ्या
यचाहनन्न्यायचुनमोधृष्णवे ॥ ३५॥ नमोधृष्णवे । चप्प्र
मृशायचुनमोनिषङ्गिणेचेषुधिमतेचुनमंस्तीक्ष्णेषवेचायुधिने
चुनमं÷स्वायुधायचसुधन्न्वनेच ॥ ३६ ॥ [५-५] नमुःस्स्रुत्त्या
य । चुपत्थ्यायचुनमुःकाट्ट्यायचनीप्प्यायचुनमुःकुल्यायच
सरस्यायचुनमोनादेयायचव्वैशन्तायचुनमुःकूप्प्याय ॥३७॥
नमुःकूप्प्याय । चावट्ट्यायचुनमोव्वीद्ध्र्यायचातप्प्यायचुन

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४१५५३५०

शु. य. संहि. मोमेग्घ्यायचविद्युत्त्यायचुनमोव्वर्ष्यायचावर्ष्यायचुनमो पृ. अ. ॥ १६ ॥
॥१६७॥ व्वात्त्याय ॥ ३८ ॥ नमोव्वात्त्याय । चरेष्म्म्यायचुनमोव्वास्त्त
व्यायचव्वास्तुपायचुनमःसोमायचरुद्रायचुनमस्त्ताम्म्राय
चारुणायचुनमःशङ्गवे ॥ ३९ ॥ नमःशङ्गवे । चपशुपत
येचुनमऽउग्ग्रायचभीमायचुनमोग्ग्रेवधायचदूरेवधायचुन
मोहुन्त्रेचहनीयसेचुनमोवृक्षेभ्योहरिकेशेभ्योनमस्त्ताराय ॥१६७॥
॥ ४० ॥ [४-६] नमःशम्भवाय । चमयोभवायचुनमःश

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४१५५३५०

ङ्करायंचमयस्करायंचनमं÷शिवायंचशिवतंरायच ॥ ४१ ॥
[१-७] नमःपार्य्याय । चावार्य्यायचनमं÷प्रतरंणायचोत्तरं
णायचनमस्तीर्त्थ्यायचकूल्यायचयम÷शष्प्यायचफेन्याय
चयमं÷सिकत्याय ॥ ४२ ॥ नमं÷सिकत्याय । चप्रवाह्याय
चनमं÷किंशिलायचक्षयणायचनमं÷कपर्दिनेचपुलस्तये
चनमंऽइरिण्यायचप्रपत्थ्यायचनमोव्रज्याय ॥ ४३ ॥ नमो
व्रज्याय । चगोष्ठ्यायचनमस्तल्प्यायचगेह्यायचनमोहृद

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४१५५३५०

स्त्र्यायचनिवेष्प्यायचनमः काट्याय च गह्वरेष्ठाय च नमः शु
ष्क्याय ॥ ४४ ॥ नमः शुष्क्याय । च हरित्याय च नमः
पाᳬ सव्याय च रजस्याय च नमो लोप्याय चोलप्याय च नमऽ
ऊर्व्याय च सूर्व्याय च नमः पर्णाय ॥ ४५ ॥ नमः पर्णाय ।
च पर्णशदाय च नमऽ उद्गुरमाणाय चाभिघ्नते च नमऽ आखिदते
च प्रखिदते च नमऽ इषुकृद्भ्यो धनुष्कृद्भ्यश्च वो नमो नमो व
ः किरिकेभ्यो देवानाᳬ हृदयेभ्यो नमो विचिन्वत्केभ्यो नमो

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

विकिक्षणुत्केभ्योनमऽआनिर्हतेभ्यः ॥ ४६ ॥ [५-८]
द्रापेऽअन्धसः ॥ द्रापेऽअन्धसस्पतेदरिद्रनीललोहित ॥
आसाम्प्रजानामेषाम्पशूनाम्माभेम्मारोङ्मोचनः किञ्चनाम
मत् ॥ ४७ ॥ इमारुद्राय । तवसेकपर्दिनेक्षयद्वीरा
युप्रभरामहेमतीः ॥ यथाशमसद्विपदेचतुष्पदेविश्वम्पुष्ट
ङ्गामेऽअस्मिन्ननातुरम् ॥ ४८ ॥ याते । रुद्रशिवा
[सं. २९ तनूःशिवाविश्वाहाभेषजी ॥ शिवारुतस्यभेषजीतयानोमृड ४१५

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

जीवसे ॥ ४९ ॥ परिनः ॥ परिनोरुद्रस्यहेतिर्वृणक्तुपरित्वेष
स्यदुर्म्मतिरघायोः ॥ अवस्थिरामघवद्भ्यस्तनुष्वमीढ्वस्तो
कायतनयायमृड ॥ ५० ॥ मीढुष्टमशिवतम । शिवोनःसुम
नाभव ॥ परमेवृक्षऽआयुधन्निधायकृत्तिंवसानऽआचरपिनाक
म्बिभ्रदागहि ॥ ५१ ॥ विकिरिद्रविलोहित ॥ विकिरिद्रवि
लोहितनमस्तेऽअस्तुभगवः॥ यास्तेसहस्रꣳहेतयोन्यमस्म
न्निवपन्तुताः ॥ ५२ ॥ सहस्राणिसहस्रशः ॥ सहस्राणिसह

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४४१५५३५०

स्तुशोबाह्वोस्त्तवंहेतयं÷ ॥ तासामीशानोभगवःपराचीनामु
खांकृधि ॥ ५३ ॥ असंङ्ख्यातासहस्राणि ॥ असंङ्ख्यातासुह
स्राणियेरुद्राऽअधिभूम्म्याम्॥ तेषांछंसहस्रयोजनेवधन्वांनि
तन्मसि ॥ ५४ ॥ अस्मिन्न्महति । अस्मिन्न्महत्त्यर्ण्णवे
न्तरिक्षेभवाऽअधि ॥ तेषांछंसहस्रयोजनेवधन्वानितन्मासि
॥५५॥नीलंग्ग्रीवाःशितिकण्ठाः ॥ नीलंग्ग्रीवाःशितिकण्ठा
दिवंछरुद्राऽउपंश्श्रिताः ॥ तेषांछंसहस्रयोजनेवधन्वानित

pdf by कृष्णशरण पोखरेल, लालबन्दी–१७, सर्लाही, नेपाल, फोन नं. ००९७७–९८४१५५३५०

न्मसि ॥ ५६ ॥ नीलग्ग्रीवाःशितिकण्ठाः । शर्वाऽअधः
क्षमाचराः ॥ तेषाᳪंसहस्रयोजनेवधन्वानितन्मसि ॥ ५७ ॥
येवृक्षेषु । शष्पिञ्जरानीलग्ग्रीवाविलोहिताः ॥ तेषाᳪंसहस्र
योजनेवधन्वानितन्मसि ॥ ५८ ॥ येभूतानाम् ॥ येभूताना
मधिपतयोविशिखासःकपर्दिनः ॥ तेषाᳪंसहस्रयोजनेवध
